एकबानी न क राज
प्रम त्क्रैए कादिन रा
के कहै ते गाडे की पजा
री करै उजरिया क दौ
फेरसि कार मे क
हैं नै को पव ... उ
रि यादेव के डोइ

उद्यान के ०ड़े
एकने ऊपर धरनी
यी पीछे ते जरेपी
देरी ते के ० ड़ीगा

२

श्रीगणेशाय नमः ॥ द्वितीये त्वनुदशाध्यायैः श्रीभागवतमादितः । तुंदुमालक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥१॥ तत्र तु प्रथमे ध्या-
येकीर्त्तनश्रवणादिभिः स्थविष्ठभगवद्रूपे मनसो धारणोच्यते ॥२॥ यन्नामकीर्त्तनं दानतपोयोगादिसत्फलं । तन्नित्यं परमानं-
दं हरिं नमत संस्मर ३ ॥ अथ द्वितीयस्कंधव्याख्या ॥ ऊक्तः एवमुपोद्घातः सप्रसंगः शुकागमः । यन्ना पूर्वं नृणां कृत्यमथाह शुकसन्मु-
निः ४ ॥ राज्ञः प्रश्नमभिनंदति वरीयानिति तेषु यापुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठो भवतः प्रश्नः कृत एष वरीयानुयतो

श्रीशुक उवाच ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप । आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ॥१॥ श्रोतव्यादीनि रा-
जेंद्र नृणां संति सहस्रशः ॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनां ॥२॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ॥ दिवा चा-
र्थेहया राजन्कुटुंबभरणेन वा ३ ॥ ॥ ॥ ॥

निद्रेति २

लोकहितमेतत् । मोक्षहेतुत्वात् । आत्मविदां मुक्तानां संमतो यतः ॥१॥ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वद-
न् । ब्रूहि यद्वा विपर्ययमित्यस्योत्तरमाह । श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानां अत एव गृहमेधिनां तत्पदं च
स्तनापदराणां मेधति हिंसार्थः ॥२॥ नैष्ठवर्षेवा पुरुषस्यायो भवतीत्यर्द्धेन नक्तं रात्रौ यद्वयः । आयुस्तन्निद्रया व्यवायेन
रत्या वा ह्रियते । दिवा चान्यद्वयः तदर्थेहया अर्थोद्यमेन सिद्धेऽर्थे कुटुंबादिपोषणेन वा चकारादनुक्तस-
मुच्चयार्थः ॥३॥ ॥ ॥ र्थे १

तरस्य स्थलं ज्योतिरनीकं ज्योतिर्मासमहं स्वर्गमिमां महर्लोकं श्रीवतिमगंतातितात पालो वं रराटं ललाटं सत्यं सत्यलोकं ।२८
मुखादेवा तेजोमयशरीरं वा तं वां हस्व इत्याह ॥ दिशः अस्मदादि श्रोत्राधिष्ठात्री देवता । कर्णौ श्रोत्रस्याधिष्ठानं शब्दस्य श्रो
त्रविषयः । तस्य श्रोत्रमिन्द्रियं । एवं नासादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासपुटे इत्यादीनि ॥२९॥ घ्रोणं नासिका । अग्नि
तरस्य लं ज्योतिरनीकम स्याग्निर्वा मुखं वदनं वेदजनि स्यात् तत्र पार राटीं विदुरादिषु स सत्यं तु शीर्षाणि सहस्रशीर्षः ॥३०॥
इन्द्रादयो बाहवः आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गंधो मुखमग्निरिद्धः ॥३१॥
घ्रोरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च । तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥३२॥
छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि । हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः ॥३३॥
घाः ३२ । नघोस्य न । अथ तनरुहाणि महीरुहा विश्वतनोः नृपेन्द्र । अनंत वीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्मगु
णप्रवाहः ३३ ॥ ॥ ॥ ९२
णानि त्रगोलकेन्द्रवक्र इन्द्रियं पतंगः सूर्यः अहनी रात्र्यहनी परमेष्ठि धिष्ण्यं ब्रह्मपदं तालु अधिष्ठानं । जिह्वा इन्द्रियं ३०
छंदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकला पुत्रादिस्नेहलेशाः द्विजानि दंताः । अनंतमार्गदुरंतः अपारः सर्गविस्तार
करा हासः ॥३१॥ अधर्म मार्गोऽस्य पृष्ठभागः । कः प्रजापतिः मित्रो मित्रावरुणौ ३२ ॥ अनंत वीर्य परस्य सः वयः का
लेः तस्य गमनं गुणप्रवाहः । प्राणिनां संसारः कर्मतस्य क्रीडा ३३ ॥ ॥ ॥ ॥

(क्रिवतं २)

वंद्रोपिसर्वविकारकोश॥

मन्मोविनो: अश्यकंप्रधानेस: प्रसिद्धः चंद्रमा: नदीयंमन: सर्वेषांविकाराणांकोशइवा श्रयभूतं ३८॥ विज्ञानशक्तिं
स्थितेमहिं महमहं। अन्त: करणमहंकारंगरित्रे। श्रीरुद्रेगाईमाहइवायांउत्पन्ना अश्वतरी ३५। वयांसिपक्षिण:
तस्यआकारं नेमन्द्र पेक्याक्षरवाणीतिमुत्तुकंश्री नेपुत्यं। यथाहुः। किंनरमुखी कृताहंसा: मुकाक्षहरितीकलाः
मयराक्षिवत्रितायेनसमेवतिंविधास्यतीति। मनुः स्वायंभुवः मनीषबुद्धिः मनुजः पुरुषः। निवास: आश्रयः पुरुष
देशस्य केश्यान्दुरं कुवाहाक्षासश्व से येन्कृरु वर्यमन्त्र:। अश्यकमाहुर्दयंमनश्च सचंद्रमा: सर्वविकारकोशः ३८।
विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोन्तःकरणंगिरित्रे॥ अश्वतरीतमुपिपुगजानबलानिसर्वमृगा: पशवः श्रो णि
देशे ३५॥ वयांसितनाकरणेविचित्रंमनुर्मनीषामनुजोनिवास:। गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानी
कवीर्यः ३६। ब्रह्माननं क्षत्रभुजोमहात्माविड्ऊरंघ्रिश्रितकृष्णवर्णः। नानाभिधाभीज्यगणोपपन्नोद्रव्यात्मकः कर्मवि
ताननयोग: ३७॥ ॥ ॥

देवाविस्मरा मात्मेतिष्कृतेः। गंधर्वादिनांद्वंद्वैक्यंगंधर्वादय: स्वरस्मृती: षड्जादी: स्वरस्मृत यस्त्वथः। असुरानीकंवीर्यं
यस्यास्मृतिरसुरानीकवीर्यइतिपाठेग धर्वादयः स्वरः असुरसमूहाश्रेष्ठः पुरुषाद्:स्मृतिरस्यस्येति ३६। ब्रह्मविप्रस्त
स्याननंमुखं। क्षत्रेक्षत्रियोभुजायस्य। विट्वैश्यऊरुर्यस्य। अंघ्रीश्रित: कृष्णवर्णः शूद्रो यस्यनामाभिधानामानिधवां
नवतेअभीज्यादिवासिद्धांगणैर्वसुरुद्रादिभिरुपपन्नोयुक्तः। द्रव्यात्मकोहवि: साधन: वितानयोगः यज्ञप्रयोग: तस्मै
कर्मकार्यं। आवश्यकं अभिप्रेतइत्यर्थ:॥३७॥ ॥ ॥ ॥ ॥

गलेवसुरुद्रादिपु तैः

किं च गृहात्प्रव्रजितः निर्गतो गृहे स्थितस्य पुनर्मृत्यासक्तिसंभवाभावात्तत्रापि षडंगयोगमाह ॥ धीर इति । ब्रह्मचर्यादियमोपल-
क्षणं । पुण्यतीर्थेति । स्नानादिनियमोपलक्षणं । आसनमाह । शुचाविति विविक्ते काले । विधिवत्कुशाजिनचैलैः क्रमेण नि-
र्मिते ॥ १६ ॥ जपगर्भं प्राणायामं वक्तुं जपमाह । त्रिवृत्त्रिभिरकारादिभिर्वर्णैर्निर्मितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् । आव-
र्तयेत् । मनसा इन्द्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह । मनो यच्छेत् तद्ब्रह्मबीजं प्रणवमविस्मरन्नेव जितश्वासः स-

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः । शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥ १६ ॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्र-
ह्माक्षरं परं । मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । मनः क-
र्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा । मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् ।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः । यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलं ॥ २० ॥

न् ॥ १७ ॥ प्रत्याहारमाह । नियच्छेदिति । अक्षान् इन्द्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः । धारणामाह । मन इति पुनश्च कर्मभि-
स्तद्यासनादिभिराक्षिप्तं । आकृष्य शुभार्थे भगवद्रूपे ॥ १८ ॥ ध्यानमाह । तत्रेति । एकमेकं पादाद्यवयवं अव्युच्छिन्नेन समग्ररू-
पादविमुक्तेन । आश्रयविशेषे सामान्येन चित्तस्थिरीकरणं धारणा । अवयवविभावनया तद्दार्ढ्यं ध्यानमिति भेदः ॥
समाधिमाह । निर्विषयं मनो युक्त्वा समाधाय । स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वैतत्स्वरूपं ॥ १९ ॥ प्रसीदति
उपशाम्यति । रजोगुणवशात्तु नरपि चेत् । अतो धारणामेव स्थिरीकुर्यादित्याह । रज इति । आक्षिप्तं तमसा विमूढं लीनं मन-
नो निरुंध्यात् । तत्कृतं रजस्तमोभ्यां कृतं ॥ २० ॥

ततः स[illegible]स्मात् यां न डं स्मृत्वा लभते आत्मप्रत्ययं विषयं प्रपश्यत स्वं त्रेवशीतिर्भवति २१ यस्यां धारणायां दृष्टीचभवतीति कर्त्तव्य
नाविषयं विशेषाणां प्रश्नः २२ एतदुत्तरमाह जितासन इति २३ । विशेषमाह स्थूल इति सार्द्धेन । विशेषो विराट् देहः ।
तस्य स्थूलानामपि स्थूलतरः । सत्कार्यमात्रे ग्रस्य चोपलक्षणमेतेन विषयस्य हं ॥ २४ ॥ केवलस्यात्मनः विराट् जीवत्वनियंतामं
गवानेवं विषयस्त्वमाह । अंडकोशे नवति । कहाह एवचविद्यावरणं । अहोजीवाद्यावरणाहंकारमहत्तत्वानीति सप्त २५

ततः संधार्यमाणायां योगिनो मनोमलहरणः ॥ आशु संपद्यते योगः आश्रयं भद्रमीक्षतः २१ ॥ श्रीराजोवाच । यथा सं
धार्यते ब्रह्मन् धारणा यत्र संमता । यादृशी वा हरेदाशु पुरुषस्य मनोमलं । श्रीशुक उवाच । जितासनो जितश्वासो जित
संगो जितेंद्रियः । स्थूले भगवतो रूपे मनः संधारयेद्धिया । २३ । विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां । यत्रेदं व्य
ज्यते विश्वं भूतं भव्यं भवच्च सत् । २४ । अंडकोशे शरीरेस्मिन् सप्तावरणसंयुते । वैराजः पुरुषो योसौ भगवान् धार
णाश्रयः । २५ पातालमेतस्य हि पादमूलं पठंति पार्ष्णिप्रपदे रसातलं । महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे २६
द्वे जानुनी सुतलं विश्वमूर्तेः ऊरुद्वयं वितलं चातलं च । महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणंति । २७ ।

विराट् देहस्त जीवतद्देतयोः मिथो भेदमाराध्योपासनं कर्त्तव्यमित्याशयेनाह । पाताले पादमूले । पादस्याधोभागः । पाता
लादीनां तद्वयवतां विधीयते पातालादीन्यतलांतानि सप्त तानि दारव्यसृष्टम मित्थंविराट्प्रणि पठंति गृणंतीत्यादि प्रमा
णं दर्शनं । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ २६ ऊरुद्वयं तस्य अधोभागो वितलं उत्तरभागोतलमिति हेयं ॥
नाभिरेव सरः २७ ॥ ॥ ॥

नभस्तलं ध्रुवलोकं १

त्रे१ निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव २

महापुरुषो विष्णुः तदीयः यशः यस्मिन श्रद्धां कुर्वतां सती=अहेतुकी।१०।साधकानां सिद्धानां च।नातः परमन्यत श्रेयोय-
त्याह।एतदिति।दृष्टतो कामिनां तत्तत्फलसाधनमेतदेव।योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं।नात्र प्रमाणं वक्तव्यमित्यर्थः।
११।=अल्पमेवायुरवशिष्टं किमहं साधयिष्यामीति मा शुच इत्याह।किमिति त्रिभिः परोक्षैः=अलक्षितैर्हायनैर्वर्षैः विदितं
यो४ वर्षौमीति ज्ञातं।मतः येन ज्ञातेन घटेत यत्नं करोति।१२।खट्वांगो हि देवपक्षे स्थित्वा देवान्जयन् ततः प्रसन्नैर्देवैर्वरेण

तदहं तेभिधास्यामि महावौरुषिको भवान्।यस्य श्रद्दधतामाशुस्यान्मुकुंदे मतिः सती।१०।एतन्निर्विद्यमानानामिच्छतामकु-
तोभयं।योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनं॥११।किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह।वरं मुहूर्तं विदितं घटते श्रेयसे
यतः।१२।खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः।मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिं।१३।तवाप्येतर्हि कौरव्य सप्ताहं जी-
वितावधिः।उपकल्पय तत्सर्वं तावद्यत्सांपरायिकं।१४।=अंतकाले तु पुरुष=आगते गतसाध्वसः।छिंद्यादसंगशस्त्रेण स्पृ-
हां देहेनु ये च तं।१५॥ ॥ ॥

त्वीप्सितेनुके ऽतस्तेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति।ततो देवैरुक्तं तन्मुहूर्तमात्रमस्तीति।ततो ऽतिशीघ्रं विमानेन भुव-
मागत्य हरिं शरणं गत इति।यतो ऽयं स्वर्गभूमेर्भूमीरजोधिका।=कर्मभूमिः पृथ्वी।१३।न वस्तु एतर्हि यदिदानीमपि तावदिति ताव-
ता कालेन सांपरायिकं पारलौकिकं साधनं संपादय।१४।तत्र वैराग्यं तावदाह।=अंतकाल इति गतसाध्वसः=मृत्युभयशून्यः।
=असंगो नाम ममतानासक्तिस्तेन शस्त्रेण।स्पृहां सुखेच्छां।तं देहमनु ये पुत्रकलत्रादयः।तेषु विषये स्पृहां छिंद्यात्।१५॥ ॥ ॥

ननु नश्वरं कुटुंबादिकं कथमायुर्व्ययं कुर्यात्तत्राह। देहादिष्वात्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्ता-
सक्तो लेबां विक्राद्दिह ष्टतेन नाशं पश्यन्नपि नानुसंधत्ते ४। एवं विपर्ययपक्षस्योत्तरमुक्त्वा श्रोतव्यादिपक्षस्योत्तरमाह। तस्मा-
दिति हे भारत भरतवंश्य सर्वात्मेति श्रेष्ठमाह। भगवानिति सेव्यत्वं। ईश्वर इत्यावश्यकत्वं। हरिरिति त्वं धत्ते रितान्। अभयं मोक्षमि-
च्छता ५। अतः परमन्यच्छ्रेयो नास्तीत्याह। एतावानेव जन्मनो लाभः फलं तमाह। नारायणस्मृतिरिति सांख्यादिभिः साध्यं इति निर्व-

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि। तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ४। तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं ५। एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामन्ते
नारायणस्मृतिः ६। प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः। नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ७। इदं भागवतं नाम पु-
राणं ब्रह्मसंमितं। अधीतवान्द्वापरादौ पितुर्द्वैपायनादहं ८। परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया। गृहीतचेता रा-
जर्षे आख्यानं यदधीतवान् ९। ॥ ।

स्यान्ते अन्तेलाभं वारयति। सांख्यमात्मानात्मविवेकः। योगोऽष्टांगः। अन्ते नु स्मृतिः परो लाभः न तत्र महिमा वक्तुं शक्य इत्यर्थः
६। तत्र सदाचारं प्रमाणयति। प्रायेणेति विधिनिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म रमन्ते ७।
किमिदमपूर्वं कथयसि। सत्यं अत्यपूर्वमेवेदमित्याह। इदं भागवतं नाम पुराणं ब्रह्मसंमितं। तत्सर्ववेदतुल्यं
यद्वा ब्रह्मसंमितं कृष्णमितं येन। कुतस्त्वया प्राप्तमत आह। अधीतवानिति ८। स्तिहस्यात्वत्कृताध्ययने प्रवृत्तिः। तत्राह प-
रिनिष्ठितोपि गृहीतचेता आकृष्टचित्तः ९॥ ॥ ।

यथा सृजति गोपायति संयच्छति संहरते ॥ पुरुशक्तिः बहुशक्तिमान् ॥ ७ ॥ क्रीडन् यथा करोति आत्मानं ब्रह्मादिरूपिणं
क्रीडयन् विकरोति विविधं करोति ॥ ८ ॥ एकः पुरुषरूपेण युगपज्जन्मभिर्वा आद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान्
गृह्णातीति ॥ ९ ॥ विविकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्नन्तु भवेन १० ॥ उपामंत्रितः प्रार्थितः प्र

यथा गोपायति विभुर्यथा संयच्छते पुनः ॥ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ ७ ॥ आत्मानं क्रीडयन्क्रीडन्क
रोति विकरोति च ॥ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः ॥ ८ ॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ॥ यथा गुणां
स्तु प्रकृतेर्युगपत्क्रमशोपि वा ॥ ९ ॥ बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः ॥ विचिकित्सितमेतन्मे ब्रवीतु भगवा
न्यथा ॥ १० ॥ शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥ सूत उवाच ॥ इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः ॥
हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥ श्रीशुकउवाच ॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥
गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥ ॥ ॥ भूय

श्री

चक्रमे देवतानुस्मरणनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ तदेवाह त्रयोदशभिः ॥ परस्मै सर्वोत्तमाय ॥ त
त्र हेतुः ॥ भूयसे अपरिमितमहिम्ने तद्दर्शयति सतः ॥ सतः ॥ प्रपंचस्य उद्भवादिषु निमित्तभूतया लीलया
गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन तस्मै ॥ अंतर्भवायान्तर्यामिणे अत एव सर्वान्तरत्वादनुप
लक्ष्यं वर्त्म यस्य ॥ १२ ॥ ॥ ॥

विचित्रफलदातृत्वमनुस्मरन्प्रणमति॥ भूयः पुनश्च नमः सतां धर्मवर्त्तिनां वृजिनं छिनत्ति दुःखहन्त्रे॥ असतां अधर्म
शीलानां असंभवाय अनुत्कर्षहेतवे॥ अखिलसत्त्वमूर्त्तये॥ तत्तद्देवादिरूपेण तत्तत्फलदायित्वार्थः॥ समग्रसत्त्वमूर्त्ति
यद्वा निवृत्तिधर्मपूर्वोक्तोभयवैलक्षण्यमाह पारमहंस्ये प्रत्यक्‌निष्ठात्मके आश्रमे। व्यवस्थितानां पुंसां अनुमृग्यं
आत्मनिष्ठत्वेन पुनः पुनर्मृग्यं पदं यस्मात्तदेव तस्य दाशुषे दात्रे॥१३॥ सात्वतानां भक्तानां ऋषभाय पालकाय। कुयोगि

भूयो नमः सद्वृजिनच्छिदे ऽसतामसंभवायाखिलसत्त्वमूर्त्तये॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदा
शुषे॥१३॥ नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां॥ निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्म
णि रंस्यते नमः॥१४॥ यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं॥ लोकस्य सद्यो विधुनोति कल्मषं
तस्मै सुभद्रश्रवसे नमो नमः॥१५॥ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोन्तरात्मनः॥ विंदंति हि ब्रह्म
गतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः॥१६॥ ॥ ॥ ॥

नां भक्तिहीनानां विदूरा काष्ठा दिगवधिर्यस्य दुर्ज्ञेयायेत्यर्थः॥ तदेवं वैषम्यप्रतीतावपि निर्दोषत्वायाधिष्ठानैश्वर्यमाह निर
स्तं साम्यं अतिशयश्च यस्मात्॥ यदीयैश्वर्यापेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे
ब्रह्मणि रममाणाय॥१४॥ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन्प्रणमति। यत्कीर्त्तनमिति द्वाभ्यां अर्हणं पूजनं सुभद्रं मंग
लं श्रवो यशो यस्य तस्मै॥१५॥ विचक्षणा विवेकिनः। यस्य चरणयोरुपासनादुपसत्तेर्भजनात्। अंतरात्मनो मनसः
उभयत्र इह च परत्र च संगं॥ व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः॥ ॥१६॥ ॥ ॥

भक्तिमन्तरेणान्यानां सर्वसाधनवैफल्यं दर्शयन्नमति॥ मनस्विनो योगिनः सुमंगलाः सदाचाराः॥ यस्मिन्नर्पणमाद्यर्प्पणं
विना। सुभद्रश्रवसे सुभद्रकीर्तये। तस्यावतीर्णस्य श्रवणादेः प्राधान्यमानायैव ॥१७॥ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह॥ किराता
दयो ये पापजातयो ये चान्ये च कर्म्मतः पापरूपाः यदपाश्रया भागवतास्तदाश्रयाः सन्तः शुध्यन्ति॥ अतः भावनांशं कांपति
हरति। प्रभविष्णवे प्रभवनशीलायेति॥१८॥ सर्वोपास्यत्वं मनुस्मरन् प्रार्थयते॥ स एष आत्मात्मवतां धीराणामात्मा आ

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः॥ क्षेमं न विंदंति विना यदर्प्पणं तस्मै सुभद्रश्रवसे नमो नमः॥
१७॥ किरातहूणान्ध्रपुलिंदपुल्कसा आभीरकंकायवनाः खसादयः॥ येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यंति तस्मै प्रभ
विष्णवे नमः॥१८॥ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्म्ममयस्तपोमयः॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलि
गो भगवान्प्रसीदतां॥१९॥ श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः॥ पतिर्गतिश्चांधकवृष्णिसा
त्वतां प्रसीदतां मे भगवान्सतां पतिः॥२०॥ यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति हि तत्वमात्मनः॥ वदंति चैत
त्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां॥२१॥ ॥ ॥

त्मत्वेनोपास्यत्वमर्थः॥ त्रयीमयत्वादिविशेषणैः तत्तन्मार्गेणोपास्यत्वं विवक्षितं॥ गतव्यलीकैः निष्कपटैः भक्तैर्वितर्क्यं अत्या
श्चर्यरीत्या वीक्षणीयं लिंगं मूर्त्तिर्यस्य स प्रसीदतु॥१९॥ सर्वपालकत्वमनुस्मरन्नाह॥ श्रिय इति॥ गतिश्च सर्वापत्सु रक्षकः॥
२०॥ ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्रीति॥ यस्यांघ्र्योरनुध्यानमेव समाधिः तेन धौतया शोधितया धिया पश्यन्ति। यथारुचं स्वरुच्यनुसारेण स
गुणनिर्गुणादिभेदैः॥ यथारुचं प्रतिभायथाममतीत्यर्थः॥२१॥ ॥ ॥ ॥

पु५०

अस्ताधारस्तानिदेशे यो ... नि २

दिस्तारयता १ श्रेष्ठः १

किं चातुराः कल्पादौ अजस्य हृदि सत्स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता स्वानि लक्षणानि निर्दिष्टा सा युक्ता नियम्या सा ॥ ऋषीणां ज्ञानप्रदानां ऋषभः ॥ २२ ॥ इदानीं स्ववाचं श्रोतृजनानां अयोग्यतादि दोषाभावं प्रार्थयते ॥ भूतैरिति । स मे वचांसि अलंकृषीष्ट अलंकुरुतात् ॥ अमुष्वपुरूषां अन्यथा लंकारास्संभवन्त्यतः करणं तत्स्वामितया मितामादिक्षुरोति ॥ यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पुरुषः अन्तर्यामितया शेते वसति ॥ अत्र पुरः

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि । स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदतां २२ ॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ॥ भुंक्ते गुणान्षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे २३ ॥ तस्मै नमो भगवते वासुदेवाय वेधसे ॥ पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवं ॥ २४ ॥ एतदेवात्मभू राजन्नारदाय विपृच्छते ॥ वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे चतुर्थोऽध्यायः ॥ ॥ ॥ ॥

वचसां मां स्वांप्रमाणयति ॥ यद्यस्मात्पुरुष इति ॥ अत एव यः एकादशेन्द्रियपंचभूतात्मवान् षोडशगुणान् कला भुंक्ते प्रकाशयति पालयतीति वा ॥ तदाहात्मनेपदमार्ष ॥ अत्र हेतुः यतः षोडशात्मा तदात्मा चेतयिता स्वार्थिकः ॥ ननु तत्र जीव उच्यते प्रार्थनाविरोधात् ॥ २३ ॥ श्रीव्यासं नमस्करोति । तस्मा इति ॥ सौम्या भक्ता यस्य मुखांबुरुहे आसवं मकरंदरसं ॥ २४ ॥ इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति ॥ एतदिति ॥ तत्त्वविद्ब्रह्मब्रह्मवेदगर्भे यस्य ॥ साक्षाद्धरिर्यदाह ॥ २५ ॥ इति द्वितीये चतुर्थः ॥ ॥ ॥

पंचमे नारदेनाथ पृष्टः सृष्ट्यादिवस्तुजः ॥ हरेर्लीलां विराड्रूपं सृष्टिं कालकर्मादिशक्तिभिः ॥१॥ नारदाय विवृण्वते वेदगर्भो भ्यधादि
त्युक्तं ॥ तत्र नारदप्रश्नमाह । देवदेवेति । हे भूतभावन अत एव सर्वेषां पूर्वज अनादे ॥ ज्ञायते नेनेति विज्ञानं तत्तु साधनं यत्तत् हि जा
नीहि विशेषेण ज्ञापय इत्यर्थः ॥ कथंभूतं आत्मतत्वं निरतां दृश्यते येन तत् ॥१॥ गुणलक्षणभूतं विषयमेवाह ज्ञानसाधनं आत्मतत्त्वं हि प्र
पंचयति । यद्रूपं येन रूप्यते प्रकाश्यते यदधिष्ठानं यदाश्रयं ॥ यतो येन सृष्टं यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं ॥ यच्चेति यदात्म

रायंत

श्रीनारद उवाच । देवदेव नमस्तेस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्वनिदर्शनं ॥१॥ यद्रूपं यदधिष्ठानं यतः सृ
ष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्वतः ॥२॥ सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञाना
वसितं तव ॥३॥ यद्विज्ञानो यदाधारो यत्परः त्वं यदात्मकः ॥ एकः सृजसि भूतानि भूतैरेवात्ममायया ॥४॥ आत्मन्भावयसे
तानि न पराभावयन्स्वयं ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥ ॥ ॥

न आत्मानं

किं स्वतः तत्कारणतो वेत्यर्थः ॥ तस्य तत्वं यथार्थं तत्वतो वद ॥२॥ नन्वज्ञा नामीति नैव वक्तव्यमित्याह ॥ सर्वमिति ॥ भूतं जातं भवज्जनि
ष्यमाणं भवत् जायमानं तेषां प्रभुर्यतः ॥ अतो विशिष्टेन ज्ञानेनावसितं निश्चितं ॥३॥ आस्तामिदं आदौ तावत्त्वामेव कथयेत्याह ॥ यतो
विज्ञानं यस्य स त्वं किं विज्ञानः इत्यर्थः ॥ एवमाधारः कस्त्वाश्रयः ॥ यत्परः यदधीनः ॥ यदात्मकः यत्स्वरूपः ॥ मम तु त्वमेव स्वतंत्रः
परमेश्वर इति बुद्धिस्तावत् परमेश्वरो न तु परमं किं चाप्यस्ति अस्तीत्याह ॥ सृजसीति ॥ एकः असहायः ॥४॥ आत्मनि भावयसे पा
लयसि स्वयमेव पराभवम प्राप्नुवन् ॥ अक्लमः श्रमरहितः ॥ ऊर्णनाभिर्यथा स्वशक्तिमवष्टभ्य सृजति तद्वत् ॥ ॥ ५ ॥

सादरं तु अस्मि न विग्र। स्मि नपरं तु तमं अपरं अधमं समं मध्यमं च॥ तत्रापि नाममनुष्यादि रूपं द्विपदत्वादिगुणाः प्रु
कृत्यादिनैमीकं साधनं तत्रापि सदसत् स्थूलं सूक्ष्मं च विदं न्यतो न वेद किं तु त्वत्त एव सर्वं भवतीति मन्ये ६॥ सततया विधी
यिभवान् तयोच्चरदितियततिननोस्मान खेद यसे मोहयसि। यतः परांशं कांईघ्वरां तरं कांमयघसि॥७॥ यथैवाहं त्वया
नुशासितः शिक्षितः सन्नेवधेवु धेयत्वचापि शोधितं ज्ञापय॥८॥ अभ्रमभिनंदति हि वत्स पुत्रं वेदं विचिकित्सितं संदेहः॥
नाहं वेदपरं त्वस्मिं नापरं न समं विभो॥ नामरूपगुणेर्भाव्यं सदसत्किंचिदन्यतः॥९॥ स मे भावान्वस्तयोरंयतपः सु
समाहितः॥ तेन खेदयसे मत्त्वं परांशं कांमयघसि॥७॥ एतमेपघतः सर्वं सर्वस्मिन्सकले घ्वर॥ विजानीहि यथैवेदमहं तु
ध्येनुशा...सितः॥८॥ ब्रह्मोवाच॥ सम्यक्पृष्टो कस्यदं वत्स ते विचिकित्सितं॥ यदहं चोदितः सौम्य भावद्वीर्यदर्शनि॥
...नानंतं तव तत्त्वा पियया मां प्रब्रवीषि भो॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे॥१०॥ ॥ ॥ ॥

तत्पूर्वकः॥ प्रश्नोयं समयानिष्पर्वः॥ यतः कारुणिकस्य तवायं प्रश्नः॥ अत्र हेतुः॥ यत् यतः परमधर्मे भावद्वीर्यप्रकाशने
प्रवर्तितोस्मि। अतस्त्वं धिक्कार्यमसि दृष्टा मेव कृतवानित्यर्थः॥८॥ ननु त्वमेव भगवानिन्स्तुत्वः पकः सृजसि महात्मनित्य
दिना सत्यं। यद्यपि मामीश्वरहीनप्रभावस्य तद्विततप्रभावंततं मनंतं यतः कारणात् एतावत्स्वभाव स्वभावः एता
वत्त्वं मेत्स्ति किंतु मत्तः परमीश्वरं हेनम विज्ञाय बूहे अतः साहसपात्रेयं भ्रान्तिः॥ नत्वबुद्धिपूर्वमनंतमित्यर्थः॥ यतो
ईश्वरान्मंएतावद्धंतमविज्ञायेतिवान्वयः॥ १०॥ ॥ ॥

म१२

तर्हि को साक्षी सर्वस्य लोके सायं भक्त्या पुनम स्कुर्वन्नेव तं कथयति।। येनेति त्रिभिः।। येन स्वप्रकाशेन चेतितं प्रकाशितमेव प्र
काशयामि स्वप्नमिव केवलं रितिमिय्या चोदयस्येन न्यप्रकाशमेव प्रकाशयति। न यस्य स्फूर्तिः।। न तत्र सूर्यो भाति न चंद्र
तारकं नेमा विद्युतो भांति कुतोयमग्निः।। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति।।११।। तस्मै नमो धीमहि
दस्य मायया मोहिताः सन्तो यत्प्रसादादयो मां जगद्गुरुं आत्मकर्तारं वदंति तस्मै।।१२।। यन्मायये ति मायासंबंधोक्तिस्तु स्याद्दुर्
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं।। यथार्कोग्निर्यथा सोमो यथर्क्षग्रहतारकाः।।११।। तस्मै नमो भगवते वासुदेवाय
धीमहि। यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं।।१२।। विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया।। विमोहिता विकत्थंते
ममाहमिति दुर्धियः।।१३।। द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।। वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोस्ति तत्त्वतः।।१४।।
यतो लोके यद्यप्यन्यत्किमस्ति संसारः नैवेत्याह मत्कपरे दमस्तो ज्ञानातीतियस्य दृष्टिपथे स्थातुं विलज्जमानयेवल
न स्वकार्यमकुर्वत्या अमुया मायया विमोहिता असत्प्रसादादयो दुर्धियोऽविद्याते वलज्ञाना एव केवलं विकत्थंते स्लाघं
ते।। अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति।।१३।। तदेवं स्वस्मादन्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादिन
वप्रश्नानां सप्रवाञ्जिष्ठानादिकं सर्वमिस्फुत्तरं वक्तुं तद्व्यतिरेकेणान्यस्याभावमाह।। द्रव्यमिति।। द्रव्यं महाभूतानि उपादान
रूपाणि। कर्म जन्मनिमित्तं। कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः।। जीवो भोक्ता वासुदेवात्परो नास्ति कारणाद्व्यतिरि
क्तं कार्यस्य।।१४।।

कन्त्वमन्वयति द्वाभ्यां नारायणः परः कारणं येषां ते अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तं । देवाश्च तदंगजाताः अतो न व्यतिरिक्ताः । लोकाः स्वर्गादयस्तदानंदांशाः । मखास्तत्साधनभूताः ।१५। योगः प्राणायामादिः । तपस्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलं ।१६। अनेनैव सर्वं तदधीनमित्युक्तं तर्हि त्वं किं करोषीत्यपेक्षायामाह । तस्यापि स्रष्टुमपि तेन सृष्टोऽहं सृजामि ईक्षया कटाक्षेण तत्र हेतवः । द्रष्टुरित्यादयः ।१७। ननु कुतोऽयं जीवेश्वरविभागः ।

नारायणपरा वेदा देवा नारायणांगजाः ॥ नारायणपरा लोका नारायणपरा मखाः ॥१५॥ नारायणपरो योगो नारायणपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥१६॥ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥१७॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥१८॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥१९॥ स एष भगवाँल्लिंगैस्त्रिभिरेभिरधोक्षजः ॥ स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥२०॥ ॥ ॥ ॥

गः । यत उक्तं प्रेरकः सृष्ट्यादिषु तत्रायं जीवेश्वरविभागहेतुमाह ॥ त्रिभिः सत्त्वमिति । निर्गुणस्यापीश्वरस्यैते त्रयो गुणाः बध्नंती मुक्तं क्रमेणान्वयः । कथंभूताः । तेनैव स्वात्मेकेन स्थित्याद्यर्थं मायया गृहीताः ॥१८॥ वस्तुतः सर्वं सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं च बध्नंति । कार्यमधिभूतं । कारणमध्यात्मं कर्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् ॥ द्रव्यं महाभूतानि ज्ञानं देवताः क्रियाः इंद्रियाणि तदाश्रयाः तेषां कारणभूताः ॥ तत्तदभिमानेन बध्नंति ॥१९॥ अतः स एव ईश्वर इत्याह ॥ एतैर्लिंगैर्जीवतामावरकैरुपाधिभिः स्वलक्षितागतिः तत्त्वं यस्य सः । स्वभक्तैरेव लक्षितागतिर्यस्येति वा ।२०।

मतमधिकृत्य वर्ततीर

॥४

परस्य नभसः कारणत्वेनान्वयाच्छब्द वांश्च वायुः ॥ तस्यैव लक्षणं प्राणादिदेहधारणं ॥ मूलः सहो बलानींद्रियमनः प्राणी
रणं पाटवानिलिङ्गान्यस्तु स्पर्शः ॥२६॥ स्वतो रूपवत्तेजः ॥ वायुनभसोः कारणभूतयोरन्वयात् स्पर्शशब्दवच्च ॥२७॥ एवमं
भसः पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं बोध्यं ॥२८॥ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्यात् गुणाधि
क्यं ॥२९॥ मनश्चैतन्ये बतदधिष्ठितं चेन्द्रियादिदृष्टव्यः ॥ अन्ये च दशदेवाः वैकारिकाः सात्त्विकाहंकारकार्याः ॥ नानाहादि शब्दवांस्त
नभसो यद्विकुर्वन्दिभस्तस्य स्पर्शगुणो निलः ॥ परान्वयाच्छब्दवांश्च प्राणओजः सहो बलं ॥२६॥ वायोरपि विकुर्वाणात्का लक
र्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत् ॥२७॥ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं ॥ रूपवत्स्पर्शवच्चां
भो घोषवच्च परान्वयात् ॥२८॥ विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २९॥
सात्त्विकात्
वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥३०॥ तैजसात्तु विकुर्वाणादिंद्रि
तैजसात्
याणि दशाभवन् ॥३१॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्रांघ्रिपायवः ॥३२॥
श्रोत्रं त्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वह्निरिन्द्र उपेन्द्रमित्रकश्च प्रजापतिः ॥
एते पंच वाक्पाणिपादपायूपस्थानां ॥३०॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञान
क्रियाविशेषरूपाणींद्रियाण्यपि तैजसानि भवन्ति तथा ॥ नानाहा श्रोत्रमिति दोःपाणिः मेढ्रमुपस्थः ॥ क्रमस्तत्र न वि
२१
वक्षितः ॥३२॥ ॥ ॥ ॥

उपेन्द्र ॥३

तत्र सृष्टिप्रकारमाह ॥ कालमिति । कर्म जीवादृष्टं ॥ विबुभूषुः विविधं भवितुमिच्छन् ॥२१॥ गुणानां व्यतिकरः ॥ क्षोभः साम्यत्या-
गः । स्वभावतः परिणामो रूपांतरापत्तिः । पुरुष ईश्वरः । तेनाधिष्ठितत्वं त्रयाणां विशेषणं ॥ महतो महत्तत्वस्य ॥२२॥ विकुर्वा-
णात् । विक्रियमाणात् ॥ तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपि रजःसत्त्वाभ्यामुपबृंहितत्वं ॥ अहंकारस्य त्वावरकत्वात्तमः-
प्रधानत्वं ॥ अत एवाहंकारकार्येषु तामसमाकाशादिकं बहु राजसं सात्विकं चाल्पं ॥ एवं सत्त्वरूपाधिकेषु जीवेष्वपि तमो वलाम साधिकं

कालं कर्म स्वभावं च मायेशो मायया स्वया ॥ आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥२१॥ कालाद्गुणव्यतिकरः परिणामः स्व-
भावतः । कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् ॥ तमःप्रधानस्त्वभव-
द्द्रव्यज्ञानक्रियात्मकः ॥ सोहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ॥२३॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥ द्रव्यशक्ति-
ज्ञानशक्तिरिति प्रभो ॥२४॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः ॥ तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः ॥२५॥ ॥

स च विकुर्वन् रूपांतरं गच्छन् ॥२३॥ त्रैविध्यमेवाह । वैकारिकः सात्विकः तैजसो राजसः यद्भिदा यस्य भेदः द्रव्यशक्तिरित्यादीनि
प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्येषु महाभूतेषु शक्तिर्यस्य क्रियासु इंद्रियेषु शक्तिर्यस्य । ज्ञाने तु देवेषु शक्तिर्यस्येति प्र-
भो बोधकं प्रभो ॥२४॥ भूतादेरिति तामसस्यैव विशेषणं ननु तामसात् कथं शब्दो भवतीति प्रसिद्धं ॥ सत्यं ॥ स तु तस्य नभसो मात्रा
स्वरूपं गुणस्त्वसाधारणः व्यावर्त्तको धर्मः शब्दग्रहणेन भूतस्य घटत इत्यर्थः ॥ एवमेव स्पर्शादिष्वपि द्रष्टव्यं ॥ शब्दस्य
ले दृश्ये लिंगमिति ॥ कुड्याद्यंतरितेन केनचिदुच्चैर्गजो गज इत्युक्ते योगजद्रष्टा यस्य तेन दृष्टो गजः सशब्दो लिंगं बोधकं लिंगविशेष
णावान यच्च द्रव्यवत्त्वं ॥२५॥ ॥ ॥

भावाश्चतुर्विंशतितत्वानि इंद्रियं ११ तन्मात्रा ५ भूत ५ बुद्धिः १ गुणाः प्रारणा एते १

वं कारणमुक्त्वा कार्यसृष्टिमाह ॥ यदा एते असंगता अमिलिता आसन् ॥ अतएव यदा आयतनस्य शरीरस्य नि
र्मिाणे न शेकुः ॥ ३२ ॥ सदसत्वं प्रधानगुणभावं उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ३३ ॥ काल कर्म स्वभावान
वस्थाय स्थितः ॥ जीवयतीति जीवः परमात्मा अजीवमचेतनं अजीवयत् चेतयति स्म ३४ ॥ निर्भिद्य पृथक् कृत्वा स्थि
तत्यर्थः ॥ ३६ ॥ तदवयवैर्लोकस्य नामाह ॥ यस्येति । कट्यादि इति । उरस्थल्यो पश्चाद्भागः ॥ जघनं पुरो भागः ॥ अधो धः
तेऽसंगता भावा भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ३२ ॥ तदा संहत्य चान्योन्यं भगवच्छक्ति
चोदिताः ॥ सदसत्वमुपादाय चोभयं ससृजुर्ह्यदः ॥ ३३ ॥ वर्षपूगसहस्रान्ते तदंडमुदके शयं ॥ कालकर्मस्वभावस्थो जीवो
ऽजीवमजीवयत् ॥ ३४ स एव पुरुषस्तस्मादंडं निर्भिद्य निर्गतः ॥ सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ३५ यस्ये
हावयवैर्लोकान्कल्पयंति मनीषिणः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३६ ॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य
बाहवः ॥ ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ३७ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः ॥ हृदा स्वर्लोक उ
रसा महर्लोको महात्मनः ॥ ३८ ॥ ग्रीवायां जनलोकस्य तपोलोकस्तनद्वयात् ॥ मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥
लोकान् अतलादीन् ऊर्द्ध्व भूरादीन् सप्त ३६ ॥ वर्णानामुत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्मणाः ॥ मुखमिति ॥ कार्यकार
णयोरभेदविवक्षया तं बाहवइति ऊरुव्यं क्षत्रियः ॥ ३७ ॥ इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् ॥ सप्तलोकपक्षमाह ॥
भूर्लोकः पातालमारभ्य पद्भ्यां कल्पित इत्यर्थः ॥ ३८ ॥ स्तनद्वयादित्युपासनार्थमादर्शो धामावैवेति त्वं न दोषः ॥ य
द्वा अनन्तरं अकुर्वन्तमयरोषवयंत स्मादित्यर्थः ॥ ब्रह्मलोकः वैकुंठाख्यः सनातनः । न तु सत्यप्रपंचान्तर्वर्तीत्यर्थः ॥ ४०

चतुर्दशलोकपर्यन्तं दर्शयति। तत्र अघनादिभिर्भूरादयः॥ पूर्वैरिव सप्तभिः कट्यादिभिरधः सप्त ...
तस्य हरिभक्तनिवासत्वात्। त्रिलोक्य समाह॥ भूर्लोकः पातालादिसहितः॥४२॥ द्वितीयपक्षे ... देवि ...
प्रोक्ता ध्यात्मादिभेदतः॥ इति कृतेन पूर्वोक्तं सर्वं पुरुषसूक्तम्॥१॥ इदानीं विराजस्य विभूतिः सप्त ... वर्णि
संसदादि वार्णि इन्द्रियाणां तदधिष्ठात्री वह्निश्च तस्य मुखं क्षेत्रं उत्पत्तिस्थानं॥ छंदसां गायत्र्यादीनां सप्तानां तस्य
जाघ
चातलं ... ऊरुभ्यां वितलं विभोः॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं॥४१॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां
घोफ पिंडुरी टखनी
रसातलं॥ पातालं पादतलत इति लोकमयः पुमान्॥४१॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः॥
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना॥४२॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे पंचमोऽध्यायः॥ ब्रह्मो
वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च॥१॥ सर्वासूनां च वायोश्च तन्
नसे परमायने॥ अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी॥ कर्णौ
च तीर्थानां श्रोत्रमाकाशशब्दयोः॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं॥३॥
॥ लगादयः क्षेत्रं इह व्यं देवानामन्नं कव्यं पितॄणां॥ अमृतं तदुभयं ... वामनुष्याणां तेषां मन्त्राणां सर्वरसस्य धुरा
... धस्य चकारात् ... दिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च एतस्य जिह्वा क्षेत्रं उत्पत्तिस्थानं। एवं सर्वत्रानुक्रमेणे
... नाम सदादि प्राणानां तस्य नासे नासारंध्रे परमायने उत्तमे क्षेत्रे मोदप्रमोदयोः ... सामान्यविशेषगंधयोः घ्राणेन्द्रियं
... तेजसां रूपप्रकाशकानां चक्षुरिन्द्रियं॥ प्रत्ति ... सर्वत्र ... नां प्रथमांतं क्षेत्रं द्रष्टव्यं॥ कर्णौ ...
... श्रोत्रमिन्द्रियं। तस्य गात्रं शरीरं वस्तूनां ये सारांशास्तेषां भाजनं स्थानं॥३

मेश्वरा ज्ञानं विश्वं ततो न भिन्नं यथा कुंडलं सुवर्णान्न पृथक् सत्तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इ
...दवेदपुरुष स्तत्कार्यकृपनेन दृढयति। तत्र स[illegible]हस्रशीर्षेत्यर्द्धर्चः स्वज्ञानेनास्य मुखमासीदित्यादिश्च ऋक्
...ः पू० वीध्याय पवद्दर्शितः॥ पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति॥ अहं भवानिति सार्द्धैः त्रिभिः॥ ते अग जाद
यादयः मरीच्यादयश्च १२॥१३॥ जलं च स्थलं चैव नभश्चो क्रांतियेषां ते॥ नमोक्स इति संधिरार्षः॥ सर्वं पुरुष एव

१ मरा२

वान नभवश्चैव यदिमे मुनयो गजाः॥ सुरासुरा नागा नागाः खगा मृगपक्षी सर्पाः॥१२॥ गंधर्वाप्सरसो यक्षा रक्षो
रगाः॥ पशवः पितरः सिद्धा विद्याधराश्चारणा द्रुमाः॥१३॥ अन्ये च विविधा जीवा जलस्थलनभोकसः॥ग
वस्तारा नडितः स्तनयित्नवः॥१४॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्॥ तेनेदमावृतं विश्वं वितस्तिम
तति॥१५॥ स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ॥ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान्॥१६॥ सोमृत
स्याभयस्येशो मर्त्यमन्नं यदत्यगात्॥ ।।।। ।।।।

ततः पृथिवी गिरयः॥ प्रपंचेन तं सापरि[illegible] दंवक्तुं समस्तमिमित्यस्यार्थमाह॥ तेन पुरुषेण विश्वमिति भूमि-पदस्यार्थः॥
वितस्तिमिति दशांगुलपदस्य॥ अधीत्यतिष्ठदस्य संचविततस्तिमध्यितुं [illegible]याप्यति ष्ठति॥ अभिव्याप्य मात्रं वितस्तिं तेन पञ्चिमाणाम्
नुपर्योगात् पविद्विषि कलाद्रुः॥१५॥ एतत्सह प्रांतमाह॥ अत्रोप्राण-आदित्यः॥ प्राणो वा-आदित्यः प्राण इति श्रुतेः॥ स्वधिष्ण्यं मंडलं
प्रतपन्नायनं॥ यश्च बहिश्च प्रकाशयति॥ एवं विराजं इदं प्रकाशयन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति॥१६॥ नित्यमुक्त्वं दर्शयितुं तमुताम
तत्वस्येत्यस्यार्थमाह॥ स इति॥ अभयस्येति मंत्रगतामतपदव्याख्या अन्नेनेति पदविभक्तिव्यत्ययेन व्याचष्टे॥ म[illegible] मरणं
धर्मकं अन्नं कर्मफलं यदत्यगात्॥ अतिक्रांतवान्॥ अनेन केवलं सर्वात्मकः॥ किं तु तत्अमृतत्वस्यापि ज्ञानंदस्याधीश्वर इत्यर्थः

अस्य हृत्कमलस्य वायोर्मिश्रसार्कः ॥ सर्वस्य मेधस्य यज्ञस्य । उद्भिज्जजातीनां सर्ववसाणां येर्वृक्षैर्यज्ञः सम्यक् साधितः
ते श्यामे वर्चसा ४ ॥ केशा मेघानां हे [illegible] त्रं पंक्तिनेयोक्तेः ॥ समस्कृताविघृतां पादकरनखानि शिलालोहानामिति सा इत्याद्युक्तं ॥
क्षेमकर्मणां पालनकर्तृणां ॥ ५ ॥ विक्रमः पादन्यासो भूरादिलोकानां आस्पदमाश्रयः ॥ भूरादि शब्दानां आत्मपक्षात्तेष
स्थाने कुक्षिमोलक्षरणं ॥ शरणं भयाद्रक्षणं ॥ सर्वेषां कामानां वरस्य वरणस्यापि हरेः संघ्रिरास्पदं ॥ ६ ॥ वीर्यस्य शुक्र
स्य स्य स्य श्रीवायोस्य सर्वमेधस्यैव हि ॥ रोमाण्युद्भिज्जजातीनां येर्वीयज्ञस्तु संभृतः ॥ ४ ॥ केशाभ्रमेघनखान्य
स्य शिलालोहान्यविघृतं ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ॥ ५ ॥ विक्रमो भूर्भुवः स्वस्य क्षेमस्य शरण
स्य च । सर्वकामवरस्यापि हरेश्चरण आस्पदं ॥ ६ ॥ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥ पुंसः शिश्न उपस्थ
स्तु प्रजात्यानंदनिर्वृतिः ॥ ७ ॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ हिंसाया निरृतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८
पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥ अव्यक्तरससिंधूनां भूतानां निधन
स्य च । उदरं विदितं पुंसो हृदयं मनसः पदं ॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च । विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणं ॥ ११ ॥
स्य । शिश्नो धिक्कानं ॥ पुंसस्य शिश्नेंद्रियं । प्रजात्यानंदः । संतानार्थः संभोगस्तेन निर्वृतिः सुखापहानि स्त स्याः ७ ॥ परिमोक्षस्य मलत्या
गस्य पायुरिंद्रियं गुदः स्थानं । निरृतिरलक्ष्म्याः ८ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां गिरीणां अस्थिसंघातः ॥ ९ ॥ अ
ते । रसो जलादिसारः सिंधवः समुद्रास्तेषां । निधनस्य लयस्य उदरं पदं स्थाने विदितं ज्ञातमित्यर्थः ॥ मनसः श्री
शरीरस्य १० ॥ तुभ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमायनं ॥ ११ ॥ ॥

त्मव्याप्तिरिति रिक्तं नेति नेतीत्यिवमुत्स्य षुम्नि छ वो देरात्स्यंदे

निरुपाधिष्ठितं कृत इत्य आह।। परमिति। यद्यस्मात् अनन्त आत्मव्याप्तिरिति पदं पदे पदे दक्षिणे दक्षिणे हृदादौ पगुह्य आश्लिष्य मान्यस्मिन्न सो हृदये बाँनपाम्भ

लाघात्महं विसर्ज्य अर्हस्य पूजस्य श्री विलीयपदंपदे सर्वतः क्षेत्र मामननं तीत्यन्वयः।। १८।। तस्मादित्थं ब्रह्मलीनेन व्यवस्थितो मुनिरुपरमेतत्

ताः संतः तद्देहलवं पदं अतएव परं सर्वतः क्षेत्रमामननं तीत्यन्वयः।। तमाह।। विज्ञाय तेनेनेति विज्ञानेशास्त्रं तेन ज्ञातार्थ ज्ञानं

नुप्राप्तेन यदि प्रयास्यन्निति वक्ष्यमाणेन्नूस कामाद्विशेषः।। तमाह।। विसृज्य देहं तत्परमनन्य सोहं दोहं दोपगुह्यार्ह पदं पदे पदे।।१९।

परंपदं वेत्ति वमामननं तिनं घेन्ने तिने ती त्यतदुत्सिसृज्य वः।। विसृज्य देहं तत्परमनन्य सोहं ... स्वपार्ष्णिनापी ड्यगुदं ततो निलं स्थाने बुधटूसन्न मयेज्जित

इत्थं मुनिरुपरमे व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः।। स्वपार्ष्णिनापीड्य गुदं ततोनिलं स्थाने ... ततोनुसंधाय धियामनस्वी स्वतालुमूलं शांत

लोमः।।१९। नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः।। ततोनुसंधाय धियामनस्वी स्वतालुमूलं ... स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्वि सृजे

कैर्नयेत्सुधीः।।२० तस्मात्भ्रुवोरंतरमुन्नयेत निरुद्ध सप्तायतनोनपेक्षः।। स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्विसृजे

त्यरंगतः।।२१।। ।। ।।

~~आसवेन ज्ञानेतरस्य ज्ञानं~~ तस्य वीर्यं बलं तेन सुसुरंधिता बहिः क्षिप्ता आशयाविषयवासना यस्य सः।। इदानीं तस्य देहत्याग

प्रकारमाह।। स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपीड्य निरुध्यानिलं प्राणं तुन्नमयेत्। ऊर्ध्वं नयेत्। त्रितः क्रमोयेन

वदृत्स्थानेषु नाभ्यादिषु।१९। नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे आरोप्य उरसि कंठाद धोदेशे स्थिते विशुद्धिच

क्रे मनस्वी जितचित्तः स्वतालुमूलं तत्स्थेकचक्रस्याग्रदेशं ततो बद्धवाग्मनसं भवाच्छनकैरिसृक्तं।। २०।। तस्माद्भ्रुवोरंतरं

आज्ञाचक्रं निरुद्धानि श्रोत्रनासिकामुखं चक्षुत्वचं सप्तायतनानि प्राणमार्गा येन सः अनपेक्षः त्यक्तं ब्रह्म गतः सन्मू

र्द्धन मूर्द्धनि ब्रह्मरंध्रे निर्भिद्य तं देहमिंद्रियाणि च विसृजेत्।। २१।। ।। ।। ।

एततसहितविषयं मनबुद्ध्यादि श्रयस्वरूपया नियम्य तन्मात्रं कृत्वा ४

एवंतावदासन्नमत्योः पुंसः कृत्यमुक्तं॥इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह॥स्थिरमिति सार्द्धैस्त्रिभिः।अंग हे रा
जन् एवंभूतो यतिर्यदा इमं लोकं देहं जिहासुः हातुमिच्छति॥तदा देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनो न सज्जयेत्॥
संगं न प्रापयेत्।न देशकालौ योगिनः सिद्धिहेतू किंतु योग एवेति दृढनिश्चयो ऽस्यास्थिरं सुखं सुखकरं चासनमास्थितः
प्राणान्नियच्छेदित्यर्थः॥१४॥ एतां बुद्धिं क्षेत्रज्ञे द्रष्टर्यादि द्रष्टरि निनयेत्॥ प्रविलापयेत्॥ तं च क्षेत्रज्ञं आत्मनि शुद्धे। तं च शुद्ध

१५

स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममंग लोकं॥ काले च देशे च मनो न सज्जयेत् प्राणान्नियच्छेन्मनसा जिता
सुः१५॥ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि॥ आत्मानमात्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमे
त कृत्यात्॥१६॥ न यत्र कालो ऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न
महान्प्रधानं॥१७॥ ॥ ॥ ॥ ॥

६

मात्मानं आत्मनैवाहं इति आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशांतिः॥ प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत्॥ ततः प
रं प्राप्याभावात्॥१६॥ तदेवाह न यत्र आत्मस्वरूपे कालो न प्रभुः॥ किमपि कर्तुं न समर्थः॥ अत एव देवा न प्रभवंति इत्याह॥ अ
निमिषां देवानां परः प्रभुः कालोपि यत्र न प्रभुः तत्र कुतो नु देवाः प्रभवेयुः दैवनियम्यानां नु जगतां प्राणिनां का वार्तेत्या
ह॥ जगतामिति कुं नु तो न प्रभवंतीत्यपेक्षायां निरुपाधित्वादित्याह॥ न यत्रेति॥ यत्र जगत्कारणं अपि न यस्य सत्त्वादी
प्रभवंतीत्याह न यत्रेति। विकारो अहंकारः॥१७॥ ॥

१० टि ८

हेतो

अथो अनंतरं कल्पान्तवह्निशिखं त्रैलोक्यं अतिदह्यमानं निरीक्ष्य तत्राप्लुष्म प्राप्तेः यद्धि परार्द्धस्थं सत्यास्थितं त्वा परमेक्ष्यं पदं प्र
ति निर्याति ।। सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिन् तत् ।। २६ ।। तदिवाह ।। नयत्रेति ।। आर्ति
दुःखं तु द्वेगो भयं किं नु वित्ततोर्यतद्दुःखं अदः अतेतदेकं विना तत् कुतो भवति । अनिदं विदा ।। इदं भगवतो ध्यानं अजान

अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं ।। निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यत् द्वैपरार्ध्यं तदु पारमे
ष्ठ्यं ।। २६ ।। न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।। यच्चित्ततोऽदः कृपयाऽनिदं विदां दुरन्तदुःख
प्रभवानुदर्शनात् ।। ।।२७।। ।। ।।

।। २७ ।।

तां प्राप्तिं नां दुरंतदुःखोयः प्रभवो जन्म तस्यानुदर्शनात्त्रातिमां कृपयायथाचित्ततोदो मनः पीडेति यत्तत हि
ना कुतश्चिदपि यत्र शोकादयो न संतीति ।। तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः । ये प्रकृत्या कर्मणा गतास्ते कल्पांतरे
पुण्यतारतम्येनाधिकारिका भवंति । ये तु हिरण्यगर्भाधि उपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यंते ये तु भग
वदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्वा वैष्णवं पदमारोहंतीति २७

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति द्वाभ्यां । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति । वैहायसानां खेचराणां सिद्धानां य
द्विहारं क्रीडास्थानं कीदृशं अष्टाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन् तदपि प्रयास्यन् चेत् गुणसन्निवाये गुणसमुदायरूपे
ब्रह्मांडे सर्वत्र स्वर्पः । न तर्हि देहत्यागावसरे मन इन्द्रियाणि च न त्यजेत् ॥ किं तर्हि सहैव तल्लोकभोगार्थं गच्छेत् ॥२२॥ यतः कर्मि
गतिवन्न योगगतिः । अंतरिति छिनत्याह ॥ योगेश्वराणां त्रिलोक्याः अंतः प्रेतश्च बहिश्च महर्लोकादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः ॥

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥२२॥ योगेश्व
राणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां ॥ न कर्मभिस्तां गतिमाप्नुवंति विद्यातपोयोगसमाधिभाजां ॥२३॥ वै
श्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा ॥ विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारं ॥२४
तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमंते ॥ ॥२५॥

अत्र हेतुः पवनस्यांतः आत्मा लिंगशरीरं येषामिति । विद्या उपासना तपो भगवद्धर्माः ॥ योगोऽष्टांगः । समाधिर्ज्ञानं तांस्तु ये भजंति
तेषां यां गतिं तां ॥२३॥ तामाह वैश्वानरमित्यष्टभिः । विहायसा आकाशेन नभश्च ब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरं अग्न्य
भिमानिनीं देवतां याति केनोपायेन सुषुम्नया नाड्या साच देहाद्बहिरपि वितता ली तया ॥ शोचिषा ज्योतिर्मय्या ॥ विधूतः त्यक्तः कल्को
मलो येन सः । अनंतरं कस्मात् स्वस्य मानदूरत्वर्तः उदस्तात् उपरि वर्त्तमानं हरेः संबंधिनः रूपं नारायणाधिष्ठितं शिशुमारसर्पं ॥ शैशुमारं च
क्रं च मस्के चैव मामातो । शिशुमारा प्रत्यये ज्योतिश्चक्रं च कल्पना नि आदित्यादि ध्रुवांतानि पदानि प्रयातीत्यर्थः ॥२४॥ तद्धि शौ चक्रं वि
श्वस्य नाभिं स्थाश्रयभूतं आविष्ट लिंगता नाभिं अशयकृन्मवंतं ततिवर्त्य अतिक्रम्य परम स्वर्गेण अंगत्वभावाद्देक एव निर्म
लेन लिंगशरीरेण ब्रह्मविदां स्थानं अत एव नमस्कृतं महर्लोकमुपैति । यत्र द्युभिर्विबुधा महाकल्पायुषो भृग्वादयः ॥२५

अड्डाह लिंगं २

ध२

तत्राह

नन्‌ जीवनमेव तेषां मायुषः फलमस्ति तत्राह ॥ तरव इति ॥ ननु तेषां श्वासो नास्ति ॥ तर्हि भस्त्राण्यस्मिको शाः ॥ ननु तासामाहारा
दिकं नास्ति नखादंतिनाप्यन्यतिनमेहंतिरितः सेकं मे पुनेन कुर्वंति ॥ किंतु तत्रापि नरा ग्रामं स्वपशुमाह ग्रामपशव इति ॥१८॥ तदे
वाह ॥ श्वादिभिः संस्तुतः सदृशो निरूपितः ॥ यस्य कर्णपथं कदाचिदपि न गतः ॥ स एव पशुः तदाह तत्पशुभिः । कुप्रमलविषय
सक्तत्वाद्धि दृष्टैर्ग्राम्यमयूरैः । कंटकवल्लुः स्वदविषयास ० क्तत्वादुष्ट्रैः ॥ भारवाहित्वात्‌ खरैः संस्तुतः स्पर्धः ॥१९॥ न स्योगा ति

तरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत । न खादंति न मेहंति किं ग्रामपशवोऽपरे १८ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः
पशुः ॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥१९॥ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ॥ जिह्वासती दा
र्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥२०॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं ॥ शावौ करौ नो कुरु
तः सपर्यां हरेर्लसत्कांचनकंकणौ वा ॥२१॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये ॥ पादौ नृणां तौ द्रुमज
न्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥२२॥ जीवञ्छवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ॥ श्रीविष्णुपद्या मनु
जस्तुलस्याः श्वसञ्छवो यस्तु न वेद गंधं ॥२३॥ ॥ ॥ ॥

वनिःफलातीत्याह ॥ बिले इति पंचभिः । बतेति खेदे ॥ न म एवलः ॥ अयम्‌ एव नो नरस्य ये कर्णपुटे ते बिले वृथा रंध्रे ॥ नन्वेदुप
गायति । नस्य जिह्वा असती दुष्टा दर्दुरी भेकस्तद्वदीयाजिकेव १० ॥ पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न नमेत्तन
हि केवलं भार एव । शावौ मृतकस्तत्करस्तु ल्योल संती कांचनकंकणौ ययोस्तौ ॥ अप्यर्थे वाशब्दः ॥२१॥ ये नयने विष्णोर्मू
र्तीन्‌ निरीक्षेते ते बर्हायिते बर्हेषु मयूरपिच्छनेत्रतुल्ये । द्रुमवज्जन्म भजत इति नपा वृक्षमूलतुल्यावित्यर्थः ॥२२॥ नाभिलभेत अ
भिलाभो न स्पृशेत्‌ न धारयेत्‌ श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायान वेदेति अवघ्राय नाभिनंदति स्पर्शः ॥२३॥ ॥ ॥

एव१

तुलस्या१

श्मसवत्सारो बलं काठिन्यं यस्य विक्रियालक्षणमाह ॥ अथेति ॥ गात्ररुहेषु रोमसु हर्षश्च ऊर्मः ॥ २४ ॥ यस्मादभक्तस्य स
र्वमिन्नधर्पमिनसोनुकूलं च प्रियं ब्रूषे ॥ अथातः साधुपृष्टः सन् वैयासकिर्नृपतिं प्रतियदाहुतदभिधेहीति ॥ २५ ॥ इति द्वि
तीयेतृतीयः ॥ ॥ तुर्ये परीक्षिता पृष्टं सृष्ट्यादि हरिचेष्टितं ॥ शुकेन ब्रह्मनारदसंवादेनोपवर्ण्यते ॥ १ ॥ ततः प्रश्नं कथयितुं

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥ अथा
भिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः ॥ यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधुपृष्टः ॥ २५ ॥ इति श्रीभाग
वते महापुराणे द्वितीयस्कंधे तृतीयोध्यायः ॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्वनिश्चयमात्मनः ॥ उपधार्य मतिं कृ
ष्णे औत्तरेयः सतीं व्यधात् १ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥ २ ॥ प
प्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गि
कं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ॥ तमो विशीर्यते मह्यं ह
रेः कथयतः कथां ॥ ५ ॥ भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥ ॥ ॥

नस्यप्राकृतीं स्थितिमाह चतुर्भिः ॥ वैयासकेः शुकस्य इति एवं भूतं आत्मनस्तत्वस्य निश्चयो यस्मात् ॥ तद्वचः उपधार्य आकर्ण्य
त्नमस्य सतीं कृष्ण एव सम्यग्नान्यद् इत्येवं भूतां ॥ १ ॥ आत्मादिषु ॥ पश्वादयः ॥ २ ॥ इममेवार्थं हरिलीलालक्षणं ॥ ३ ॥
संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकाम प्रधानं संन्यस्य स्वकर्म आत्मभावं परमप्रेमाणं भगवदात्मसंगतः प्राप्तः सन् पप्रच्छ
मह्यं मम तमोऽज्ञानं नश्यति तव कथयतः ॥ अतः समीचीनं ॥ ५ ॥ पुनश्च वेदितुमिच्छामि दुर्विभाव्यं अविज्ञेयं यथा
सृजति ॥ ६ ॥ ॥

श्रेष्ठां ३ मतिं औत्सेत ३ क दुं

यज्ञं यज्ञोपाधिं विष्णुं कोशो वसूं स्तवयः॥ वसुकाम इत्य॥ अत्र धनमात्रं इति भेदः॥ दांपत्यमन्योन्यप्रीतिः॥ तदिवार्थीयस्य सः॥
७ धर्म्मार्थः धर्म्मकामः॥ उत्तमश्लोकोपाधिं विष्णुं॥ तंतुं तन्वन् संतानवृद्धिमन्विच्छन् रक्षा बाधानिवृत्तिः तत्कामः पुण्यजनान्
यक्षान्॥ ओजो बलं तत्कामो मरुद्गणान् देवान्॥ मनून् मन्वंतरपालान् यद्वा यज्ञ संतं तत्कामः॥ राज्ञः कर्म्म राज्यं तत्कामो
विश्वान् देवानिति विशेषः॥ अभिचरन् शत्रुमरणमिच्छन् निर्ऋतिं अलक्ष्मीं॥ कामकामो भोगेच्छुः अकामः वैराग्यकामः
यज्ञं यजेद्यशःकामः कोशकामः प्रचेतसं॥ विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं॥७॥ धर्मार्थ उत्तमश्लोकं तंतुं त
न्वन् पितॄन् यजेत्॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान्॥८॥ राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत्॥ का
मकामो यजेत् सोमम् अकामः पुरुषं परं॥९॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः॥ तीव्रेण भक्तियोगेन यजेत पुरुषं प
रं॥१०॥ एतावानेव यजतामिह निःश्रेयसोदयः॥ भगवत्यचलो भावो यद्भागवतसंगतः॥११॥ ॥ ॥

पुरुषं परं॥ प्रकृतिव्यतिरिक्तोपाधि[illegible]मीश्वरं॥९॥ अकामः एकांतभक्तः उक्तानुक्तसर्वकामो वा पुरुषं पूर्णं निरुपाधिं
१०॥ पूर्वोक्तनानादेवताभजनस्याविष्टं योगपक्षत्वेन भक्तियोगफलमाह॥ एतावानिति॥ इंद्रादीनपि यजतामिह
तत्तद्रूपेण भागवतानां संगतो भगवत्यचलो भावो भक्तिर्भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषा
र्थस्योदयः लाभः अन्य[illegible]त्तु सर्वं तुच्छमित्यर्थः॥११॥ ॥ ॥ ॥

हि

त।

तासु रतिं को न कुर्यात् इत्यन्वयः।

१९

भागवतसंगं इत्यनेन सूचितां हरिकथारतिं स्तौति। ज्ञानमिति। यत्र यासु कथासु ज्ञानं भवति। कीदृशं आसर्वतः
प्रतिनिवृत्तं उपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत्। उत अनन्तरं तद्धेतुरात्मप्रसादश्च। यत्र यासु म
नःप्रसादहेतुः गुणेषु विषयेषु असंगो वैराग्यं च। उभयत्रेति। पाठे इहामुत्रगुणेष्वसंगः। कैवल्यमित्येवं संमतः पं
थायो भक्तियोगः। निर्वृतः श्रवणसुखेन। अन्यत्रानिर्वृत इति वा। तासु हरिकथासु को रतिं न कुर्यात्॥ १२॥

त।

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः॥ कैवल्यसंमतपथस्त्वथ भक्तियोगः को नि
र्वृतो हरिकथासु रतिं न कुर्यात्॥ १२॥ शौनक उवाच॥ इत्यभिव्याहृतं राजा निशम्य भरतर्षभः॥ किमन्यत्पृष्टवान्

भा.

भूयो वैयासकिमृषिं कविं॥ १३॥ एतच्छुश्रूषतां विद्वन्सूत नोर्हसि भाषितुं॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रु
वं॥ १४॥ स वै भागवतो राजा पांडवेयो महारथः। बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे॥ १५॥ वैयासकिश्च भगवान्वा
सुदेवपरायणः॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे॥ १६॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ॥ तस्य
र्तेयत्क्षणो नीत उत्तमश्लोकवार्त्तया॥ ॥ १७॥ ॥ ॥ कैडीडन् २

अभिव्याहृतमुक्तं॥ ऋषिं परब्रह्मदर्शिनं॥ कविं सर्वज्ञानि [illegible] मन्तं॥ १३॥ श्रवणेच्छायां हेतुः। हरिकथा एव उदर्क
उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां स्युः॥ १४॥ तत्प्रपंचयति स वा इति श्लोकाभ्यां॥ कृष्णक्री
डां कृष्णक्रीडां यः स्वीकृ [illegible] तवान्॥ १५॥ उरुगायस्य गुणैरुदारा महत्तराः कथाः स्युः॥ १६॥ किंच वक्ष्ये तद्धी [illegible] यमाण
मायुर्हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः। आयुरिति। असौ सूर्य उद्यन्नस्तं च यन् असत्यमदप्रतिं च यत्र ॥ छान्नस्य
तु यत्क्षणो नीतस्तस्यायुर्नैव क्षयितापमेव हरति॥ ॥ १७॥ ॥

तृतीये वि[illegible] छु भक्तिसंविधिर्ध्यंम एव तो मुनेः॥ अत्र पुंडरीकेण तत्कर्म्मश्रवणादर ईर्यते॥१॥ इदानीमन्यदेवताभजन
स्यापि पुत्रादिभजनवद्देव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति॥ एवमेतन्निगदितं॥ कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु
अविष्कृयेमनीषिणस्तेषां तत्रापि म्रियमाणाः॥ तेषां विशेषत एवमेतद्धरिकथाश्रवणादिकं निगदितं विशीतमित्यर्थः॥

मृक्तडवाच॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां॥१॥ ब्रह्मवर्चसका
मस्तु यजेत ब्रह्मणस्पतिं॥ इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन्॥२॥ देवीं मायां तु श्रीकामस्तेजस्कामो विभाव
सुं॥ वसुकामो वसून्रुद्रान्वीर्यकामोथ वीर्यवान्॥३॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोदितेः सुतान्॥ विश्वान्देवान्
राज्यकामः साध्यान्संसाधको विशां॥४॥ आयुःकामोश्विनौ देवौ पुष्टिकाम इलां यजेत्॥ प्रतिष्ठाकामः पुरुषो रोदसी
लोकमातरौ॥५॥ रूपाभिकामो गंधर्वान्स्त्रीकामोप्सरउर्वशीम्॥ आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनं॥६॥ ॥ ॥

१॥ ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं॥ इंद्रियपाटवकाम[illegible]स्त्विंद्रं॥ प्रजापतीन्दक्षादीन्॥२॥ मायां दुर्गां विभावसुं अग्निं
वसुकामो धनार्थी॥ वीर्यं प्रभावः तत्कामो वीर्यवान्॥ सन्रुद्रान्यजेत्॥३॥ अन्नाद्यं भोज्यं भक्ष्यं च॥ अदितेः सु
तान्द्वादशादित्यान्॥ विशां देशस्थप्रजानां स्वाधीनतामिच्छन्यजेत॥४॥ इलां पृथ्वीं प्रतिष्ठा स्थानादप्रच्युतिः
रोदसी द्यावाभूमी॥५॥ अप्सरसा स्वासी उर्वशी प्रीचितानाम्॥६॥ ॥ ॥ ॥

न्वीर

संतिसंसरतः पुंसोवह्वोमोक्षमार्गास्तथापियोगादयः॥ समीचीनस्त्वयमेवेत्याह॥ नहीति॥ यतोनुष्ठिताद्भक्तियोगोभवेत्‌॥ अतो
न्यः शिवः सुखरूपोनिर्विघ्नश्चनास्त्येव॥३३॥ कुतइत्यत्राह॥ भगवान्‌ब्रह्मकूटस्थोनिर्विकारः॥ एकाग्रचित्तःसन्त्रिरित्यर्थः॥
त्रिस्त्रीन्वारान्‌॥ कार्त्स्न्येनसाकल्येनब्रह्मवेदं अन्वीक्ष्यविचार्ययतआत्मनिहरौरतिर्भवेत्‌॥ तदेवमनीषया अध्यवस्यत्‌निश्चि
तवान्‌॥३४॥ ननुअनुभूतेर्विषयेरतिर्भवति अननुभूतेतुभगवतिकथंरतिस्यात्तत्राह॥ भगवान्‌लक्षितःदृष्टः कथंस्वात्मनासाक्षित्वं

नह्यतोन्यःशिवःपंथाविशतःसंसृताविह॥ वासुदेवेभगवतिभक्तियोगोयतोभवेत्‌॥३३॥ भगवान्‌ब्रह्मकार्त्स्न्येनत्रिरन्वीक्ष्यमनी
षया॥ तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत्‌॥३४॥ भगवान्सर्वभूतेषुलक्षितःस्वात्मनाहरिः॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टालक्ष
णैरनुमापकैः॥३५॥ तस्मात्सर्वात्मनाराजन्‌हरिःसर्वत्रसर्वदा॥ श्रोतव्यःकीर्तितव्यश्चस्मर्तव्योभगवान्नृणां॥३६॥ पिबंति
येभगवतआत्मनःसतांकथामृतंश्रवणपुटेषुसंभृतं॥ पुनंतितेविषयविदूषिताशयंव्रजंतितच्चरणसरोरुहांतिकं॥३७॥
इतिश्रीमद्भागवतेमहापुराणेद्वितीयस्कंधेद्वितीयोध्यायः॥ ॥ ॥ ॥

टर्भि:

तर्यामितया॥ केः दृश्यैर्बुद्ध्यादिभिः॥ तदेवद्वेधादर्शयति दृश्यानांजडानांदर्शनं स्वप्रकाशं द्रष्टारंविनानघटतइत्यनुपप
त्तिरूपेणलक्षणैः स्वप्रकाशांतर्यामिलक्षकैः॥ तथाबुद्ध्यादीनिकर्तृप्रयोज्यानिकरणत्वाद्वास्यादिवदितिव्याप्तिमुखेनानु
मापकैः॥ स्वंतत्रद्रष्टाकर्तेत्येवमीश्वरसिद्धिः॥३५॥ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति॥ तस्मादिति॥३६॥ श्रवणा
दिफलमभिनयेनाह पिबंतीति सतांआत्मनः आत्मत्वेनप्रकाशमानस्यकथैवामृतं॥ विषयैर्विदूषितंमलिनीकृतंआशा
यंपुनंति शोधयंति तस्यचरणपद्मांतिकं श्रीविष्णुपदंव्रजंति॥ ॥ ॥ ॥ ॥ द्वितीयेद्वितीयः॥ ॥ ॥

वास्याकु
ठारः२

तत्तदालेलेनं ... शकात्मीवातरे

भोगावसाने।

नमः॥ तस्यांशेनस्पर्शतन्मात्र द्वारा २

गवा।

तत्र प्रकृतस्य भङ्गक्रमस्य प्रलादि भेदन प्रकारमाह॥ ततइत्यादिना तत्रेयं प्रक्रिया॥ ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन
महत्तत्वं भवति तस्यांशेनाहंकारः तस्यांशेन शब्दतन्मात्र द्वारा वायुः॥ तस्यांशेन रूपतन्मात्र द्वारा तेजः तस्यांशेन रसतन्मा
त्र द्वाराऽप्यापः तदंशेन गंधतन्मात्र द्वारा पृथ्वीति भूमिरिति तेभ्यश्च चतुर्दशभुवनात्मकं विराड्रूपशरीरं तस्य पंचापञ्चीकृतेभ्यो हिरण्यजनवि
शालस्य वृक्षविशेषो वाडकटाहविशेषशब्दवाच्याको हिरण्यजनविशेषो अण्डमावरणं पंचापञ्चीकृतो हिरण्यविशालमित्येके। ततश्च ज
ततोविप्रोबंप्रतिपाद्यतिर्मयस्तेनात्मनापोमेनलमर्चिरिह रन॥ ज्योतिर्मयो वायुमुपेत्य काले वाद्यात्मना खंबह दात्मलिं
गं २८॥ घ्राणेन गंधं रसनेन वैरसं रूपं तु दृष्ट्या श्वसनं त्वचैव॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी॥
वादीनां येपरिणतानांशाः तान्येवोत्तरं दशगुणान्यावरणानि क्रमेणैव प्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथिव्याद्यावर
णभेदप्रकारः कथ्यते। ततोविप्रोबंत्राप्तिपाद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः॥ एवमुत्तरत्रापि द्रष्टव्यं। निर्मयः कथं
स्यामीतिशंकाम्प्य ...ः तेनात्मनापृथिवीरूपेण तन्निरंतरमुत्तरापः प्रतिपद्यत्र्युरन् ... मनुर्वन॥ ... दात्मसेन ... दहा
हादिशंकाभावाद्येयं भोगान्भुंजानो नइत्यर्थः॥ एवं ज्योतिर्मयः स्वकाले भोगावसाने वहत ... आत्मनोऽलिंगं परमात्म
स्वरूपं हि नोपासनेषु ... ॥ यद्वाद्यात्मना तस्य प्रमापकमिति २७॥ इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह॥ घ्राणेनाधि
ष्ठितेन गंधं ... स्पर्शेन नभोगुणत्वं शब्दात्मतां प्राणेन तत्कर्मेंद्रियव्यापाराकूतिं तत्क्रियां॥ २९॥

तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महांसयोगी विकार्यसंसाध्य विज्ञानं तसंयाति।। विविधं कार्यं महद्धेतिविकार्यो हि हंकारः।। सत्त्विविधः तामसो राजसः।। सात्विक इति। तत्र तामसात् ज्ञाननिभूतसूक्ष्माणि जायंते।। राजसाद्दशेंद्रियाणि।। सात्विकान्मन इंद्रियदेवाश्च तेषां लयश्च तत्तदहंकारे तत्र भूतसूक्ष्माणामिंद्रियाणां च सत्त्विकं लयस्थानं तामसं राजसं च मनोमयं देवमयं च सात्विकं प्राप्य क्रमात् त्याग एवं गमनेन तेनाहंकारेण विज्ञानं तत्वं महत्तत्त्वं संयाति। ततो गुणानां सम भूतसूक्ष्मेंद्रियसत्त्विकर्षमनोमयं देवमयं विकार्यं।। संसाध्य गत्या सह तेन याति विज्ञानं तत्त्वं गुणसत्त्विरोधः।। २० ।। तेनात्मना आत्मानमुपैति शांतमानंदमयो वसाने।। एतां गतिं भागवतीं गतो यः सवै पुनर्नेह विषज्जते ऽग।। २१ ।। एते सती ते नखवेद गीते दसयामिय वेदसनातने च।। येन प्रसा ब्रह्मण आदयष आराधितो भगवान् वासुदेवः।। ।। २२ ।। ।।।।

निरोधो लयाय स्त्रिन्नु अत्र तस्य प्रधानं याति।। ३० ।। तेनात्मना नाप्रधानरूपेणानंदमयः सन्नुपाधी नाम वसाने शांत मविकृतमानंदं परमात्मानमुपैति।। नविषज्जते नावर्ततइत्यर्थः।। ३१ ।। सती मार्गे द्विकाम्य विनत्यर्थः।। हे नृप यत्र पेद्यो निर्मिथ्य मद्ध्यौ विरुज्जेत् परे गत द्युतेर्यासद्योमुक्तिः पकासतिः। यदि त्रयस्यापरान्तिकत्यादिना क्रममुक्तिः सतिद्वया।। एते सती वृद्धे न गीते नुक्रेन नुद्धवा त्रिहिशिते।। तत्र यदा सर्वे प्रमुच्यंते।। कामा येस्य हृदि श्रिताः। अथ मर्त्योमितो भवत्यत्र ब्रह्म समश्नुत इति सद्यो मुक्तिः तिः। अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं इत्यादिना क्रममुक्तिः। सर्वेदनो को रूत्ता । एहाग्नेन कर्म्मभिर्लोकांस्तेन मानुवेतीति। दक्षिणमार्गस्यापि सूचितत्वादेते सती इति द्विवचने।। २८ प्रा मिसपरेयब्रीतवरमियाहि प्रस्थिता यां मुक्तिविवर्जयेद्व अपि सती पक्षे व्यहियक्षावि पथ्यमितिश्चदक्षिणमार्गोपिप्राप्यः।। एवं सद्याचपपृते सतीइत्यन्वयः।। ।।३२।। ।। ।।

उन्निद्रं विकसितं यत्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन्योगेश्वरैरास्थापितौ पादपल्लवौ यस्य ॥ श्रीरेव लक्ष्म चिह्नं तत्र
युक्तं ॥ पामादिविहितो मत्वर्थीयो न प्रत्ययः ॥ कौस्तुभरत्नं कंधरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्यास्तया वनमालया आ
चितं व्याप्तं ॥१०॥ स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमानेनाननेन यो हासस्तेन पेशलं सुंदरं ॥११॥ अदीन मुदारं यल्लीलाहसि
तं तेन यदीक्षणं तस्मिन्नुल्लसंतो ये भ्रूभंगा विक्षेपास्तैः सूचितो भूरिरनुग्रहो येन चिंतामयं चिंतया आविर्भवितं ॥१२॥ अ

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं ॥१०॥
विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलैः कुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥११॥
अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥१२॥ ए
कैकशोंगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥१३॥
यावन्न जायेत परावरेस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥१४॥

सेवध्यानमाह । एकैकश इति । अनुभावयेत् ध्यायेत् । यद्धसितं अयत्नतः स्फुरितं पादगुल्फादि स्थानं अवयवं वा तदपोह्य त्य
क्त्वा परं परं । जंघाजान्वादि धारयेत् । शुद्ध्यति तस्मिन्निष्ठा भवति ॥१३॥ पूर्वोक्तं वैराजधारणाया फलद्वारेणांगसमाह ॥ यथा
यावदिति परे ब्रह्मादयो वरे यस्मात् ॥ कुतो विश्वेश्वरे । द्रष्टरि नतु दृश्ये चेतनत्वघनतात् ॥ भक्तियोगः प्रेमलक्षणः क्रिया
वसाने आवश्यककर्मानुष्ठानानंतरं अनेन कर्माविभक्तियोगपर्यंतमेव स्मर्त्तव्यम् ॥१४॥ ॥ ॥ ॥

ध्यायेत ३

ह विरक्तसेव्यइत्याह ॥ एवं विरक्तः सन् तं भजेत भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः ॥ अर्थं यतः आत्मा अत एव प्रियः प्रियस्य च से
वा सुखरूपैव । अर्थश्च सत्यः ॥ न ह्यनात्मवत् मिथ्या भगवान् भजनीयगुणश्च अनंतश्च नित्यः एवंभूतस्तं भजेत नियतार्थः निश्चलस्व
रूपः ॥ तदनुभवानंदेन निर्वृतः सन्निति स्वतः सुखात्मकत्वं दर्शितं किंच यत्र भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ॥ ६ ॥ ए
देवान्यचिंतां निंदयाद्रुच्यति ॥ क इति ॥ तां तथाभूतां परस्य हरेरनुचिंतां धारणामनादृत्य पश्यन्नात्मकर्मजडान् विना ॥ यथा[illegible]प पशुरेव सदे

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः । तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥ कस्तां त्वनादृत्य परानु
चिंतामृते पशूनसतीं नाम कुर्यात् ॥ पश्यन् जनं पतितं वैतरिण्यां स्वकर्मजान्परितापान् जुषाणं ७ ॥ केचित्स्वदेहांतर्हृदयावकाशे
प्रादेशमात्रं [illegible] पुरुषं वसंतं ॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥ ८ ॥ प्रसन्नवक्रं नलिनायतेक्षणं कदंबकिंज
ल्कपिशंगवाससं ॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं ॥ ९ ॥ ॥ ॥ ॥

वानामिति पशुकृतः ॥ असतीं विषयचिंतां को नाम कुर्यात् तया चिंतया वैतरिण्यां पतितं ॥ तत्र च स्वकर्मजान् आध्यात्मिकादि क्ले
शान्सेवमानं जनं पश्यन् वैतरणी यमद्वारस्था नदी तत्कल्पत्वात् संसृतिर्वैतरणी ॥ ७ ॥ तामेव धारणां सविशेषणामाह केचि
दिति त्रिभिः स्वदेहस्यांतः मध्ये यत् हृदयं तत्र योवकाशस्तस्मिन् वसंतं ॥ प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति ॥
हृदयप्रमाणं तत्रोपचर्यते ॥ कंजं पद्मं रथांगं चक्रं ॥ ८ ॥ नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य ॥ कदंबकुसुमस्य
किंजल्काः केसरास्तद्वत्पिशंगे पीते वाससी यस्य लसंति महारत्नानि येषु तानि स्वर्णमयान्यंगदानि यस्य स्फुरंति च तानि महा
रत्नानि च तन्मयानि किरीटकुंडलानि यस्य ॥ ९ ॥ ॥ ॥ ॥ ॥

पृ ज्ञीवानू ...मारी॥ बान वस्थी॥ सत्यास ...तृ त्तलो कीवाहल गमना

प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह॥ महिमेति॥ प्रपंचात्मकस्याप्यम
मृतत्वमित्येष महिमा दुरत्ययः॥ अपारः प्रपंचेनाभिभूतत्वादिति भावः॥ मंत्रे एव च एतावानस्य महिमा विभूतिः सतु ज्यायानू॥
म हृत्तम इति वदतायमेवार्थ उक्तः॥ तदेवमीश्वरो नित्यमुक्त इत्युक्तं॥ तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थापयेति दर्शयन् पादो
स्य विश्वा भूतानि इत्यस्यार्थमाह॥ पाद इति॥ तिष्ठंत्यत्रेति स्थितयो भूरादिलोकास्ते पादा इव पादाश्चतुर्थांशाय स्य सस्थितिपात्रस्य
पादेष्वप्रभूतेषु लोकेषु सर्वाणि विदुः॥ मंत्रे तु पादोस्य विश्वा भूतानीति समानाधिकरणत्व मधिष्ठानाधिष्ठेययोर्भेदविवक्षया॥ पा

अंमेषु — जनलोक तपलोक सत्यलोक

महिमैव ततो ज्यायान्पुरुषस्य दुरत्ययः॥ पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः॥१७॥ अमृतं क्षेममभयं त्रिमूर्ध्नो धायि मू
र्धसु॥ पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः॥१८॥ ॥ ३

पृ२

इत्येतद्वचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति॥ भूतेषु फलवैचित्र्यं दर्शयन्॥ त्रिपादस्यामृतं दिवीत्यस्यार्थ
माह॥ अमृतमिति॥ अस्येश्वरस्य संबंधि त्रिपादमृतं नित्यसुखं दिवि ऊर्ध्वलोकेन त्रिलोक्या मित्यर्थः॥ तदेव त्रिपाद्विधा त्रेधा विधां दर्शय
न्नाह॥ त्रयाणां लोकानां मूर्धसु महर्लोकः॥ तस्य मूर्धनि तदुपरितन लोकाः॥ तेषु यथाक्रमं॥ अमृतादिकं अधायि निहितं॥ तत्र त्रि
लोक्यां नश्वरमेव सुखं॥ महर्लोकस्य क्रममुक्तिस्थानत्वेपि कल्पांते तत्रस्थानां स्थानत्यागाद्विनाशि सुखं जनलोके त्वमृत
मविनाशि सुखं यावद्ब्रह्मस्थानापरित्यागात्॥ किंतु महर्लोकवासिनां कल्पांते त्रिलोकदाहोपप्लुतानां तदा तत्र गमनादर्द्धे
मदर्शनमस्ति॥ तपोलोके तस्याभावात् क्षेममेव॥ वस्तुतः हि त्रिलोक्यां दह्यमानायां भ्रांत्या संकर्षणाग्निना॥ यांत्यूष्मणा महर्लो
कात्प्रजनं भगवद्ध्यायार्दिता इति॥ सत्यलोके तु भयमेव न॥ अपुनरावृत्तेस्तस्य॥ एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन्॥ त्रिपादूर्ध्व उदैत्पु
रुषस्यार्थमाह॥ प्रजायंते पुत्रादिरूपेणेत्यप्रजाः॥ नैष्ठिक ब्रह्मचारि वनस्थ यतयस्तेषामाश्रमाः॥ त्रिलोक्या बहिरासन्॥१९॥ ॥ ॥

पादा अंशा
न तु पाद सुमत ... का रतं
प्रसिद्धो ...

गृहमेधस्ततः यस्मात् अप्रवहद्भुतः ब्रह्मचर्यव्रतरहितः ॥ अयं चाधिकारभेद एकस्यैवावस्थाभेदेन ॥ न तु तत्त्वं भिन्नविषय
तिदर्शयिष्यते नो विष्णुडि. तस्यार्थमाह ॥ विविधं सु अंचतीति विष्वक् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चल
ति स्म ॥ कथंभूते सती सा[illegible]शनानशने भोगापवर्गप्राप्तिसाधनभूते अत्र हेतुत्वेन पुनर्विशेषणं ॥ यद्यतः अविद्याकर्मरूपा
परकाविद्या च तत्साधनोपासनारूपान्या १९ ॥ तदेवं विराडं तर्द तिनां फलवैचित्र्यमुक्त्वा तत्कारणेश्वरस्य तद्धेतुत्वं लक्षणं द
अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽवहद्भुतः ॥ सृती विचक्रमे वि[illegible]ष्वक् साशनानशने उभे ॥ यदविद्या च [१३] पुरुषस्तूभयाश्र
यः १९ ॥ यस्मादंडं विराड् यज्ञे भूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् २० ॥ यदास्य नाभ्यान्न
लिनादहमासं महात्मनः ॥ नाविदं यज्ञसंभारान्पुरुषावयवादृते ॥ २१ ॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ॥ इदं च दे
वयजनं कालश्चोरुगुणान्वितः ॥ वस्तून्योषधयः स्नेहा रसलोहमृदो जलं ॥ २२ ॥ ॥ ॥

दर्शयितुं तस्माद्विराडुर्जायते तस्यार्थमाह ॥ यस्मादंडं जज्ञे तत्र च भूतेंद्रियगुणात्मको विराट् च यज्ञे स ईश्वरः ॥ न तु विश्वं
विराड्देहं द्रव्यं अत्यगात् अतिक्रांतवान् सूर्य इवेति एवं नित्य एव दृष्टांतः २० ॥ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च पृ
थग्भावाद्यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशंक्य तत्स्वरूपतया यज्ञस्य पुरुषत्वेन [illegible] हविषेत्यादिमंत्रार्थसंग्रहं दर्शयति ॥ यदेत्यादिना अस्य
ते विराडं तत्र मिलितः तस्यैव प्रकटं जातः ॥ नाभौ भवं नाभ्यं तस्मात् यज्ञस्य संभारान् ॥ साधनानि नापश्यं २१ ॥ तदा ते पुरुषावयवेषु साध्य
सन्तु पुरुषावयवैः प्रतिसंभाराः संभृताः इति चतुर्थेनान्वयः ॥ वनस्पतयो यूपाः देवयजनं यज्ञभूमिः । इदं चेति वचनाद्धि घ्राते
स्थानेऽपि विप्रः कल्पयतीति गम्यते ॥ बहुगुणान्वितो वसंतादिकालः वस्तूनि पात्राणि औषधयो व्रीह्यादयः ॥ स्नेहा घृतादयः ।
रसा मधुरादयः ॥ सुवर्णादीनि लोहानि मृदश्च २२ ॥ ॥ ॥ ॥

कार्यत्वात् ४

२

विद्याव

चातुर्होत्रं होत्रादिकं कर्म नामधेयानि ज्योतिष्टोमादीनि ॥ अग्न्यादीनामुक्तत्वान्मंत्रा इति स्वाहाकारादयः २३ देवतानामनुक्रम
उद्देशाः ॥ कल्पो बोधायनादिकर्मपद्धतिर्ग्रंथः ॥ अनेनाहं यजे इति संकल्पः ॥ तंत्रमनुष्ठानप्रकारः ॥ गतयो विष्णुक्रमाद्याः ॥
मतयो देवताध्यानानि ॥ कृतस्य भावतिः समर्पणं ॥ २४ ॥ संभृताः संपादिताः संभारा येन सोऽहं ॥ २५ ॥ तेनैव यज्ञेनैव अनेन यज्ञे

होत्रादिकर्म ज्योतिष्टोमादि वेदोक्ता उद्देश कर्मपद्धतिग्रंथ ॥ अनेन यजे इति ॥

ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च ॥ २३ ॥ देवतानुक्रमः कल्पः संकल्पस्तंत्र
मेव च ॥ गतयो मतयश्चैव प्रायश्चित्तं समर्पणं ॥ २४ ॥ पुरुषावयवैरेते संभाराः संभृता मया ॥ इति संभृतसंभारः पुरुषा
वयवैरहं २५ तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं ॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव २६ ॥ अयजन् व्यक्तमव्यक्तं पुरु
षं सुसमाहिताः ॥ ततश्च मनवः काले ईजिरे ऋषयोऽपरे २७ ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं ॥ नारायणे भ
गवति तदिदं विश्वमाहितं ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥ २८ ॥ ॥ ॥

न यज इति ज्यंते देवा इति मंत्रार्थः स्फुटितः २६ ॥ तेन देवा अयजंते तस्य स्पार्थं सप्रपंचं दर्शयति ॥ तत इति द्वाभ्यां ॥ व्यक्तमिं
द्रादिरूपेण ॥ अव्यक्तं स्वतः ॥ अनेन पुरुषं ज्ञातमगतः इत्यस्यार्थो दर्शितः कालेस्वस्वावसरे ॥ २७ ॥ यदधिष्ठानमित्यं
तस्य प्रसंगात्तदर्थमुपसंहरति ॥ नारायण इति ॥ आहितं आश्रितं ॥ भगव द्देहे तु ॥ अगुणः स्वतोऽगुणः ॥ सर्गादौ ग
हीतामायया उरवो गुणा येन तस्मिन् ॥ २८ ॥ ॥ ॥ ॥

ज्योतिष्टोम आमत ... पेर

अनुष्ठानं प्रकारतं

पत्यरस्य मित्येतत्त्वस्मोत्तरं यदुक्तं स एव भगवान् सर्वेषां मम चेश्वर इति तदुपसंहरति॥ सृजामीति॥ पालनं स्वयमेव
करोमीत्याह॥ विश्वमिति॥ पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्मायां तां धारयतीति तथा सः॥ २८॥ यद्वेदं विश्वं यदात्मकम् स्थूल
मेव मादि सर्वं त्रिप्रश्नानां समानोत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोस्तीति तदाह इति॥ पुरुष एवेदं सर्वमिति ऋक्त्या
चयह्कृतं तदुपसंहरति॥ इतीति॥ कार्यकारणात्मकं भाव्यं सज्जं भगवतः सकाशादन्यत् पृथक् न भवतीत्यभिहि

सृजामि तन्नि एकोहं हरोहरति तद्वशः॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्॥२९॥ इति तेभिहितं तात यथेद
मनुपृच्छसि॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं॥३०॥ न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः
न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ३१॥ सोहं समाम्नायमयस्तपोमयः प्रजापतीनाम
भिवंदितः पतिः॥ आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवः॥३२॥ ॥ ॥

तं ३०॥ यदुक्तं एतावद्वेदितव्यं तो हि मेतमविज्ञाय मामीश्वरं प्रब्रवीषि इति तदुपपाद्योपसंहरति॥ न भारतीति॥ यत
यस्मान्मे मया औत्कंठ्यं भक्त्युद्रेकः तद्युक्तेन हृदा हरिर्धृतो ध्यातः॥ अंग हे नारद॥ अतः मे वाङ्मन इंद्रियाणां वृत्तयः॥
सत्याः॥ न तु मम प्रभावेनेत्यर्थः॥३१॥ तत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति सोहमिति॥ सोहं समाम्ना
यादिभिः सर्वोत्कृष्टोपि योगमास्थितोपि यत आत्मनो मम संभवो जन्म तमेव न ज्ञातवान् कुतोन्यस्य वार्ता एतद्ब्रह्मणीय
स्कंधे प्रयोजवेवदत्ते॥३२॥ ॥ ॥ ॥

पृथ्ववतारमाह ॥ यद्यदा ऋषिभिरर्थितः ॥ तदा वेणं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रा-
यते सुतः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदव्युत्पत्तिः ॥ कथंभूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लु-
ष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तं ॥ ऋषभावतारमाह ॥ येन च जगति जगद्वर्ये वसन्ति नगर्न्नादिकृत्या लिदुग्धाः ॥ ऋषभा-
वतारमाह ॥ असौ हरिर्नाभेरग्नीध्रपुत्रात्सुदेव्याः सुनुरास । नाभेर्भार्यायामेरुदेव्याम् एव सुदेवीत्यपि संज्ञा जडयोगेन नित्यस्य

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरयेपतंतं ॥ त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधास-
कलानि येन ॥९॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्यां ॥ यत्पारहंस्यमृषयः पदमामनंति स्वस्थः
प्रशांतकरणः परिमुक्तसंगः ॥१०॥ सत्रे ममास भगवान्हयशीर्षषो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः ॥ छंदोमयो मखमयो-
ऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः ॥११॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो नि-
खिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥१२॥ ॥ ॥

मार्गेण योगचर्यां यश्चरितवान् ॥ तत्र हेतुः समदृक् तत्रापि हेतुः स्वस्थः स्वः स्वरूपे स्थितः यतः प्रशांतेन्द्रियः ॥ तत्कुतः ॥ यतः परित्यक्तसंगः ॥
हयग्रीवावतारमाह ॥ सत्र इति ॥ अग्र इति [illegible] स एव साक्षात् भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षोऽभूत् ॥ तपनीयं सुवर्णं तद्वद्वर्णो
यस्य ॥ छंदोमयो वेदमयः ॥ तद्विधेया मखाः तन्मयः आमखमय इति वा पाठः ॥ मखेर्यजनीया अखिला देवतास्तदात्मा च ॥ तस्य श्वसतः श्वा-
सं मुंचतः नस्तो नासापुटात् उशत्यः कमनीयाः वेदलक्षणा वाचो बभूवुः ॥११॥ मत्स्यावतारमाह ॥ मत्स्यो भाविनो वैवस्वतमनुना
दृष्टः ॥ क्षोणीमयः पृथ्वीपिधानस्तदाश्रय इत्यर्थः ॥ अत एव निखिलजीवनिकायानामाश्रयः ॥ मे मुखाद्विस्रंसितान् गलितान्
वेदमार्गान् वेदानादाय तत्र युगांतसलिले विजहार ह हर्षित ॥१२॥ ॥ ॥

या२

कूर्मावतारमाह। क्षीरोदधौ कच्छपवपुः सन्नुगोत्रं मेघनार्थं मंदरगिरिं पृष्ठेन विधृतवान्। कदाऽमलतलदुधये क्षीराब्धिमुन्म
थ्नतां सतानि दृ.. ाः देवाः ऽवसरं तत्सवेदे वा यस्य सः। निद्रायाऽवसरः कः। तत्राह। ऽद्रेः परिवर्तः परिभ्रमः क
वापाः कषणं स्त्रस्त्र देयस्यां सा कंडूर्यस्या। यद्वाऽद्रिपरिवर्त एव कषः कषणं तेनागतिऽपयातीति कषणा कंडूर्य

क्षीरोदधौ व मरदानवयपानामुन्मथ्नताममतलब्धय आदिदेवः। पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्रालसोऽद्रिप
रिवर्तकषणाकंडूः॥१३॥ त्रैविष्टपोरुभयहास नृसिंहरूपं कत्वाभमहुकुटिदंष्ट्रकरालवक्त्रं॥ दैत्येंद्रमाशु गदयाभिपतं
तमाराद्दूरोनिपात्य विददार नखैः स्फुरंतं१४। अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः॥ आ
हेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय१५॥ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः॥
पतगराजभुजाधिरूढः। चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार॥१६॥ ॥ ॥

स्य१३॥ श्रीनृसिंहावतारमाह। त्रैविष्टपादेवास्तेषामुरुभयं हंतीति तथा स भगवान् कंपंभ्रलंभ्रमं त्यो भ्रुकुटिर्दंष्ट्र
श्च यस्मिन्नेतत्करालं वक्त्रं यस्मिन्नत दैत्येंद्रं स्फुरंतं आरात्समीप एव गदयाऽपलक्षितं ऽभिपतंतं नखैर्विददार१४
हरिसंज्ञकावतारमाह। अंतरिति युगलेन। गजयूथस्य पतिः॥ तीर्थरूपं श्रवो यस्य स तीर्थश्रवाः। हे तीर्थश्रवः।
श्रवणेनैव मंगलं नामधेयं यस्य१५॥ तद्वचनं श्रुत्वाऽरणार्थिनं तद्धस्ते गृहीत्वा ग्राहस्य किं कृतवान् नक्रस्य ग्राहस्य वद
नं विनिपाट्य विदार्य तस्मादुद्दनात्॥१६॥ ॥ ॥ ॥

नृसिंहरूपं कृत्वा हिरण्यकशिपुं नखैर्विददार। अथवा त्रैविष्टपा दैत्या हिरण्यकशिपोराज्यकाले ते
षामुरुभयजनको हासो यस्मिन् तादृक् त्रैविष्टपोरुभयहासं तादृक् नृसिंहरूपं कृत्वा ४

तत ४

वामनावतारमाह॥ अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः। यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान्
श्रेष्ठः। गुणानेवाह। यद्यतः इमान् लोकान् विचक्रमे पादन्यासैः क्रांतवान्। अथ प्रतिष्ठितानां तस्मैव तत्र हेतुः। बलेः क्ष्मां वा-
मनरूपेण जगृहे। नन्वीश्वरः स्वयं किमिति न याचके तत्राह॥ याञ्चां विना धर्ममार्गे बिभ्रमाणेन चाल्यः। ऐश्वर्यान्न भ्रंशनीय इ-
ति॥१७॥ ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशङ्क्य ततो ऽधिकं स्वसालोक्यादि दास्यामीत्यभिप्रायेन कृतवानित्याह॥ नार्थ्य इति।

पादन्यासैः क्रांतवान् — बलेः

ज्यायान्गुणैरवरजो ऽप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः॥ क्ष्मां वामनेन जगृहे त्रिपदछलेन याञ्चामृते प-
थि चरन्प्रभुभिर्न चाल्यः॥१७॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं। यो वै प्रतिश्रुतमृ-
ते न चिकीर्षदन्यदात्मानमंग मनसा हरये ऽभिमेने॥१८॥ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगं।
ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव॥१९॥ ॥ ॥ ॥

यद्विबुधाधिपत्यं इदानीं बलात्प्राप्तं अग्रे दीयमानं च अयं बलेः पुरुषार्थो न भवति कुत इत्यत आह॥ आ अप इति छेदः उरु-
क्रमस्य पादशौचं चरणक्षालनरूपा अपः आ सर्वतो धृतवतः कं शिरसा यां मूर्ध्नीत्यर्थः किंच गुरुणा वारितः शप्तोपि अंग हे
नारद प्रतिश्रुतं विना अन्यत् न चिकीर्षत् कर्तुं नैच्छत् तृतीयपादपूरणार्थं हरये आत्मानं देहमपि अभिमेने अंगीकृतवा-
न्। एवं सर्वदत्त्वे लोकं श्रद्धया दत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः॥१८॥ हंसावतारमाह॥ तुभ्यमिति। भृशं विवृद्धेन भा-
वेन अत्युत्कृष्टया भक्त्या परितुष्टः सन् भक्तियोगं साधुयथा तथा उवाच॥ ज्ञानं चेति ज्ञानसाधनं किं तत् भागवतं नाम कथं-
भूतं तत्त्वमेव सत्तत्त्वं दीपकं विवृद्धभावेनेति विशेषणस्य फलमाह यदिति॥१९॥ ॥ ॥ ॥

आत्मतत्त्वदीपं१ क्ष्मां आत्मसार४ शिखा५

तत्तन्मन्वं[..]तरावतारमाह॥ चक्रमिति। स्वतेजः निजं प्रभावमेव चक्रं सुदर्शनं विभर्त्ति। चक्रवदप्रतिहतं प्रभावं बिभर्त्तीत्यर्थः॥
मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेपि कमनीयां स्व[..]कीर्त्तिं विस्तारयन् राजसु दंडं वि[..]धत्ते२०
धन्वंतर्यवतारमाह। लोकैर्वती[..]र्यधन्वंतरिः सन् पुरुरुजां महतां रोगिणां स्वनाम्नैव रुजो रोगान् हंति। स्वयमेव कीर्त्तिरिति
कीर्त्यतिशयोक्तिः। अमृतं मरणाभावत्वं आयुर्यस्मात्सः। अवअवरुंधन्नेवं[..]दैत्यैः प्रतिबद्धं यज्ञभागंच अव[..]रु[..]धे लभते। अव

चक्रंच दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्त्ति दुष्टेषु राजसु द[..]मेवादधात्स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथ
यंश्चरित्रैः॥२०॥ धन्वंतरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति। यज्ञे च भागममृतायुरवावरुंध्य
आयुष्यवेदमनुशास्त्यवतीर्य लोके॥२१॥ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्तिलिप्सु। उद्धंत्यसा
ववतिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन॥२२॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गु
रोर्निदेशे। तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्त्तिमार्च्छत्॥२३॥ ॥ ॥

परुद्धमिति वा पाठेऽयमर्थः। आयुर्विषयं वेदं चानुशास्ति प्रवर्त्तयति॥२१॥ परशुरामावतारमाह॥ जगतः क्षयाय विधि
नादैवेनोपभृतं संवर्द्धितं मृत्यवे समर्पितमिति वा। ब्रह्मणेभ्यो द्रुह्यतीति तथा उज्झितः पंथा वेदमार्गो येन। अत एव नरका
र्त्तिं लिप्सतीति। एवंभूतं अवनेः कंटकतुल्यं क्षत्रं असौ महात्मा हरिः। उद्धंति उत्पाटयति। दीर्घतीक्ष्णधारेण परशुना२२॥ रामा
वतारमाह त्रिभिः। अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह॥ कलानामीश[..]। गुरोर्दशरथस्या
ज्ञया तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश। यस्मिन्विरोधं कृत्वा दशकंधरो नाशं प्राप्तः॥२३॥ ॥ ॥

स्थलेष

यस्मै रामाय तु दधिर्मार्गं ददौ सपदि शीघ्रं हराय त्रिपुरं दिधक्षुः न हतत्र त्रिपुरं लंकां दग्धुमि[illegible] ष्टोः पक्षी च तुर्थ्यर्थे यि ठाप्
च मीयं। दिधक्षो रामात् यद्वयं प्राप्तं तेनां गेकं पोयस्येति॥ कथंभूत तउदधिः। कठं प्राप्तं यद्वयं तेन अंगे षु वेपः कंपो यस्य। अत्र
हेतुः। दूरे वर्त्तमाना सुरहस्ती नातया निमित्त भतयाम थित तम्भितो रोषः तेन स्फुरोणा अत्यरुणा दृष्टिस्तया अत्यंतं तप्यमानं म
करा एणा मुरगा णां च नक्रा णां च चक्रं यस्मिन्॥ २४॥ किंच। युद्धे रावणस्य वक्षस्थलेन रुग्णौ भग्नाये महेंद्रवाहस्यैरावतस्य दंता

यस्मात्त्रदाद्दु[illegible] दधिस्तु ठ भयांग वेपो मार्गं सपदि त्रि पुरं हरवद्दिधक्षोः॥ दूरेस्तुह मथितरोष स्फुरोणा दृष्टया तातप्यमा
नमकरोरगनक्रचक्रः॥ २४॥ वक्षस्थलस्पर्शरुग्न महेंद्रवाहदंतैर्विडंवितककुब्भ कठहासं। सद्योसुभिः सह विनेष्य
ति दारहर्तुर्विस्फूर्जितैर्धनुषउच्चरतोधिसेन्ये २५॥ ॥ ॥ ॥

सैर्विडंविता स्व धवलिम्ना धवलीकृताः॥ तत्तदिक्पतिभेः प्रका[illegible] शितायइत्स्पर्द्धाः [illegible] याएवं भूताः ककुभो दिशः ताडश
यनेस वनेपालयतीति नथानस्य दारहर्तुः रावण[illegible] स्य अहो मत्समः को न्योस्तीति महा गर्वेण कठं भ्राप्तंहासं अस्सुभिः
प्राणैः सह सद्यः शीघ्रं विनेष्यति। अपने [illegible] ष्यति। कै धनुषो विस्फूर्जितैः टंकार घोषैः रेव कथं भूतस्य अधिसेन्ये स्व
परसेन्य मध्येउच्चरतः॥ उत्कर्षेण विचरतः। ककु[illegible] ब्भयरूढ्हासमिति पाठे। दंतैरुज्वालितानां ककुभां दिशां जयेन
यो रूढहासः सं जातगर्वस्तमपनेष्यतीत्यर्थः॥ २५॥ ॥ ॥

श्रीकृष्णावतारमाह। भूमेरिति दशभिः। सुरेतराः असुरांशाः संभूता राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पी-
डितायाः कलया रामेण सह जातः ननु कोऽसौ जातः सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात्स्वित् कृष्णकेशमात्रं शोभैव।
न तु वयःपरिमाणकृतं अविकारित्वात्। यदुक्तं विष्णुपुराणे। उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति। एवं भारते।
स चापि केशौ हरिरुद्बबर्ह शुक्लमेकमपरं चापि कृष्णं। तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च॥ तयोरेको

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः॥ जातः करिष्यति जनानुपलक्ष्यमार्गः क-
र्माणि चात्ममहिमोपनिबंधनानि॥२६॥ तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः॥ यद्रिंग-
तान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं॥२७॥ ॥ ॥

बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशव एव बभूव केशो यो सोऽवतीर्णः कृष्णस्तु कृष्ण इति। ननु
केशमात्रावताराभिप्रायं किं तु भारावतारणरूपं कार्यं कियदेतन्न मत्केशा एव तत्कर्तुं शक्ता इति द्योतनार्थं रामकृष्ण-
योः शुक्लकृष्णवर्णसूचनाय च केशोद्धरणमिति गम्यते अन्यथा तत्रैव परस्परविरोधापत्तेः॥ कृष्णस्तु भगवान्स्वयमित्येतद्वि-
रोधात्। कथंभूतः परमेश्वरतया जनैरनुपलक्ष्यो मार्गो यस्य। तर्हि परमेश्वरत्वे किं प्रमाणं अत आह कर्माणीति मानुषकर्मण्यनुपपत्तिरेवे-
त्याह। आत्मनो महिमा उपनिबध्यते एभिः लक्ष्यते येषु तानि॥२६॥ एतदेव प्रपंचयति। तोकेनेत्यादिना बालेन पूतनाया जी-
वहरणं यदुलूकिकायाः रिंगता जानुभ्यां गच्छता अन्तरगतेन मध्यं प्राप्तेन दिविस्पृशोरर्जुनयोः इतरथा अनीश्वरत्वे तन्न भवितव्यं॥२७॥

भारतविष्णुपुराणे ८

अमरहेतो

धृंगो वर्द्धनं धर्त्ता धारयिष्यति
देवेंद्रेडुपमन्नु रिस्मरः रिरक्षिषुरित्यर्थः ॥ अनघेन मस्मरहितेन प्रदर्शितेन बकेरसलीले यथा मही
डक्षिलिं ध्रुतडूते छत्राकमिवासप्तवर्षाणि वयो यस्य सः ॥३२॥ निष्ठिरात्रौ निशाकूरस्मिभिः गोपीयी धवलायां वने क्रीडन्नुका
लानि मञ्जुलानि पदानि यस्मिन् तद्भुतत्र आयते दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं तेन नद्धीपितास्मरः कुर्यासां तासां
गोपिनां हर्तृः शंखचूडस्य शिरो हरिष्यति ॥३३॥ ये च प्रलंबादयः ते सर्वे हरिणा हेतुभूतेन नदीं पं निलयं अदर्शनं दर्शनायोग्यं

गोपेर्मखे प्रतिहते ब्रजविप्लवाय देवेंद्रवर्षति पशून् कृपया रिरक्षुः ॥ धर्त्तोच्छिलिंध्रमिव सप्तदिनानि सप्तवर्षोम
हीध्रमनघे कबेरसलीलं ॥३२॥ क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन। उद्दीपितस्मर
रुजां ब्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥३३॥ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः
अन्ये च शाल्वकपिवल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ॥३४॥ ये वा मृधे समितिशालिन आत्तचापाः
कांबोजमत्स्यकुरुकैकयसंजयाद्याः। यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ॥३५॥ ॥

धेनुकं अलं मास्यंतीत्युत्तरेण अन्वयः खरो धेनुकः दर्दुर इव दर्दुरो बकः ॥ इभः कुवलयापीडः। कपिर्द्विविदः। कुजो नरकः ॥३४॥
ये च मृधे आत्तचापाः समितौ संग्रामे शालते श्लाघंते समितिशालिनः ॥ ननु प्रलंबखरकपिवल्वलरुक्मिप्रमुखा बलभद्रेण नि
हताः। कांबोजादयश्च भीमार्जुनादिभिः। शंबरः प्रद्युम्नेन। यवनो मुचुकुंदेन न तु हरिणा। तत्राह। बलो भीमः पार्थ इत्यादयो
व्याजाह्वयाः कपटनामानि यस्य तेन। सप्तोक्षाणः स्कंतेन दमिताः कालांतरेण यास्यंतीति भावः। एतच्च सर्वमपि कर्मादिव्यामि
व तद्वाम्य पान भाव्यमिति द्रष्टव्यं शेषं वसंतं वधः ॥ ॥२५७ श्रु बब

पीतं

विषतोयपीतान् विषमजलतोयस्पर्शपानं येषां पालानां गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्रीडन्नुरगं कालि
यं उद्वासयिष्यति। तच्छुद्धये तस्या ह्रदिन्या निर्विषतायै इति विषवीर्यपाविलोलाञ्च लालितकायस्य ॥२८॥ दिव्यमलौकिकं ॥ द्रुवे
तिलीकोक्तिः ॥ उन्नेष्यति कुहरिष्यति। प्रवृद्धोष्मः तत्संबन्धिनि वनेषु षट्कः स्वर्षः ॥ अतो दावाग्नेर्हेतोः अवलिप्तो निक्षिप्तो नन्तकालोय
स्पतं ॥ सबलः सरामः अनधिगम्यं दुर्वीर्यं वीर्यं यस्य सः ॥ तत्र तित्रिनिः प्रायानमिति ॥ कालियदमने राज्ञां यमुनातीरे ॥ नेत्रे

मदेव व्रजे व्रजपमध्ये विषतोयपीतान्पालांश्च जीवयदनुग्रहदृष्टिवृष्ट्या ॥ तच्छुद्धये निर्विषवीर्यविलोललञ्छिकमुद्वासयिष्यदु
रगं विहरन्नुद्धृदिन्यां २९ ॥ तत्कर्मदिव्यमिव यन्निशि निःशयानं दावाग्निनाशुचि वने परिदह्यमाने ॥ उन्नेष्यति व्रजमतो व
सितं नकालं नेत्रे पिधाय स बलो नधिगम्यवीर्यः ॥ ३० ॥ गरली तयघंटुपबंधममुष्य मातामुल्वं सुतस्य ननु तत्रादम
ष्यमाति ॥ सद्रुं भलोस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥ ३० ॥ नेदं च मोक्ष्यति भयाद्वरुण
स्य पाशात् गोपान्बिलेषु पिहितान्मयसूनुना च ॥ अह्नापतं निशि शयानमतिश्रमेण लोकं विकुंठ उपनेष्यति गोकुलं स्म ॥ ३१

पिधा [illegible] यपिहिते कारयिष्यति मुञ्चा[illegible]त्यामिति ज्ञेयं ॥ २९ ॥ उपबध्यतेऽनेनेति उपबंधं तेन साधनं उल्वं दाम तत्र मुष्यमा
ताय शोदाः आसीत् अमुष्य न माति बंधनं सूत्रमितं न भवति न पूर्यते इत्यर्थः ॥ गोपी यशोदा संवीक्ष्य ह्रदि प्रतिबोधिता
निजैश्वर्यं ज्ञापिता आसीदिति यतः न तत्कर्म दिव्यमिवेति सर्वत्र पूर्वेणैवान्वयः ॥ ३० ॥ वरुणस्य पाशात [illegible] यद्व यंत
स्मात् मोचयिष्यति मयसूनुना व्योमनाम्ना आपतं व्या[illegible] पतं निशि शयानमिति च वैकुंठप्राप्तिसाधनानुष्ठानाभावात् क्लि
न ॥ उपनेष्यति प्रापयिष्यति। गोकुलवासिनं जनं स्मेत्याश्चर्ये ॥ ३२ ॥ ॥ ॥ ॥

दैत्यामोह

व्यासावतारमाह ॥ अनुयुगं मीलिता संकुचिता धीर्येषां ॥ स्तोकमल्पमायुर्येषां स्वनिगमः स्वकृतो वेदराशिः ॥ बत अहो दूरे पारं य
स्य सः ॥ दुर्गम इत्यवमृश्य सत्यवत्यामाविर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ३६ ॥ बुद्धावतारमाह देवद्विषां निष्ठिता
नां निरतानां स्थितानां तद्बलेन च पूर्भिः पुरीभिः अदृश्यतूर्भिः अलक्ष्यवेगाभिः ॥ मतेर्विमोहः येन स्यात् योग्यत्यागो यस्मात् मतेः प्रलो
भश्च अस्मात् स्वीकारो यस्मात् पाषंड वेषं विधाय तेन औपधर्म्यं पाषंडधर्मं ॥ स्वार्थे ष्यञ् । बहु भाषिष्यत इत्यर्थः ॥ ३७ ॥

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः ॥ आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं वि
टपशो विभजिष्यते स्म ॥ ३६ ॥ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः । लोकान् घ्नतां मति
विमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं ॥ ३७ ॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाषंडिनो द्विजजना
वृषला नृदेवाः । स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगांते ३८ । सर्गे तपोहमृषयो नव ये प्र
जेशाः स्थानेथ धर्ममखमन्वमरावनीशाः ॥ अंते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ३९ ॥

कल्क्यवतारमाह ॥ यर्हि यदा सतामप्यालयेषु गृहेषु त्रैवर्णिकाः पाषंडिनः स्युः शूद्रा राजानः स्युः तदा कल्किरूपेण क
लेः शास्ता भविष्यति । अत्रैव ब्रह्मनारदसंवादात्प्रागभाविनो वराहादयः मन्वंतरास्त्वभूताभाविनश्च । धन्वंतरिपरशुरामोत
दावत्रैते । श्रीरामादयस्तु भाविनः । तत्र तु क्वचिद्भूतादिति दृश्याः छांदसत्वादिति द्रष्टव्यं ॥ ३८ ॥ सर्गादिकार्यभेदेन माया
गुणावतारविभूतीराह ॥ सर्ग इति । स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्च अमराश्च अवनीशाश्च ते संहारे त्वधर्मरुद्रः ।
मन्युवशाः सर्पाः बहुशक्तिधारिणो भागवत इमा विभूतयः ॥ ॥ ३९ ॥ ॥

३

स्यते

मू २

पताराध

स्कंभरोधने ५

इदं मया संक्षे[पे]णोक्तं विस्तरेण वक्तुं न कोपि समर्थ इत्याह पृथिव्या परमाणूनपि यो विममे गणितवान् नाहं सोपि विकोनु वि
ष्णोर्वीर्यगणनां कर्तुमर्हतीति कथंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं च स्कंभितवान् । किमिति च स्कंभ । यस्मात्त्रिविक्रमेऽस्खलता
प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनं महदीप्सानं प्रधानं तस्मादारभ्य उरुः अधिकं कंपयानं कंपमानं कंपे
नयानं यस्येति वा । अतः कारणात् स्कंभ । आत्रिपृष्ठमिति वा छेदः ॥ सत्यलोकमभिव्याप्य यः सर्वं धृतवानित्यर्थः ॥ तथा च मंत्रः ॥

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ॥ चस्कंभ यः स्वरंहसास्खलता त्रिपृष्ठं यस्मात्त्रिसा
म्यसदनादुरुकंपयानं ॥ ४० ॥ नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये । गायन् गुणान् दशशता
नन आदिदेवः शेषोधुनापि समवस्यति नास्य पारं ॥ ४१ ॥ येषां स एव भगवान् दययेदनंतः सर्वात्मनाश्रितपदो यदि नि
र्व्यलीकं ते दुस्तरामति[तरंति]च देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ॥ ४२ ॥ ॥ ॥

विष्णोर्नु कमिति । अस्यार्थः विष्णोर्वीर्याणि कं प्रवोचं कः प्रावोचदित्यर्थः ॥ यः पार्थिवानि रजांस्यपि विममे सोपि । यो वि
ष्णुस्त्रेधा विचक्रममाणः ॥ त्रिविक्रमं कुर्वन्नुत्तरं लोकं अस्कभायत अवष्टब्धवान् कथंभूतं सधस्थं सह स्थं सधादेशः ॥ ति
ष्ठंतीति स्थाः तत्र स्थे देवैः सह वर्तमानमित्यर्थः ॥ ४० ॥ एतत्प्रपंचयति ॥ नांतमिति । पुरुषस्य यन्मायाबलं तस्यांतं न विदाम्यि
दशशतान्याननानि यस्य सोपि अस्य गुणान् गायन् अद्यापि न समवस्यति न प्राप्नोति ॥ ४१ ॥ यदि न केपि विदंति तर्हि कथंभूत्वा तरंतु
त्कुपयेदेत्याह । येषामिति । दययेत् दयां कुर्यात् । ते च यदि निःकपटं आश्रितचरणा भवंति । ते दुस्तरां देवमायां अतितरं
ति च करामलकवद् भवं विदंति च । अवेति वा पाठः प्रत्यक्षमेव ते बोधमायांति तरणमित्याह । नैषामिति । श्वसृगालानां भ
क्ष्ये देहे ॥ ४२ ॥ ॥ ॥

२

॥

॥

नां

अंतः स्नानाभावे विमायेयमिति ज्ञानं तत्कृपया बहूनामस्तीत्याह विदाम इति। यूयमिति सनकादीनं गर्भाद्य बहुवं। देवहूत्याः प्र- २
ह्लादः मनुः स्वायंभुवः तस्य पत्नी च तदात्मजाः पुत्राः कन्याश्च प्राचीनबर्हिषो बिसर्गलोप श्छांदसः ऋभुः शतधनुः अनुश्च सेधिरा।

वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः॥ पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरंग उत
ध्रुवश्च ४३ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरा गयनाहुषाद्याः॥ मांधात्रलर्कशतधन्वनुरंतिदेवा देव
व्रतो बलिरमूर्त्तरयो दिलीपः ४४॥ सौभर्युतंकशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः॥ येऽन्ये विभीषण-
हनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः॥४५॥ ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि
पापजीवाः॥ यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये॥४६॥ ॥ ॥ ॥

श्रुत

र्यः रंतिदेवा इति पाठः स्वराम एकपद्येऽप्येतैः सहितो देवव्रत इत्यर्थः॥४४॥ उपेंद्रदत्तः श्रुकः विभीषणादयो वर्या मुख्या
येषां ते ४५ किंबहुना सत्संगेन सर्वे पि विदंतीत्याह ते वा इति। अद्भुताः क्रमाः पादन्यासा यस्य हरेस्तत्परायणाः स्त-
द्भक्ताः तेषां शीलेन शिक्षा येषां ते तथा यदि भवेति। तर्हि ते पि विदंतीत्यर्थः। श्रुते भगवतो रूपे धारणा मनो नियमनं
येषां ते विदंतीति किमु वक्तव्यं॥४६॥ ॥

किं तद्भगवतः स्वरूपं यस्मिन्मनो धारणीयं विधाय मायां तरं तीत्वेत्याशयेनाह ॥ शश्वदिति द्वाभ्यां । यद्ब्रह्मेति विदुर्मुनयः । तद्वै भग
वत्स्वरूपं किं तत्कुत्स्नतदाह । अतः संचितसंचतनं तु सुखे च विशोके चेति । अत्र सुखे हेतुः शश्वत् सदा प्रशान्तं अतो नित्यसुखरूपं
विशोके हेतुः अभयं नु यतः समं भेदग्रहशून्यं अतोऽभयं । द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं ॥
ननु ज्ञानस्यापि नीलपीताद्याकारेण च कर्त्रादिकरणभेदेन च भेदो दृश्यते । नेत्याह । शुद्धं निर्मलं । ननु दर्शितो विषयकरणोपरागरूपो मलः ।
इत्यत आह । सदसतः परं विषयकरणसंगशून्यं वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः ॥ ननु तथापि ज्ञात्रा सह भेदः स्यात् । न । आत्मतत्त्वं
शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं । शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च वि
लज्जमाना ॥४७॥ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं । सध्र्यङ्नियम्य यतयो यमकर्त्तहेतिं जह्युः स्वराडिव निपानखनि
त्रमिन्द्रः ॥४८॥
आत्मनो ज्ञातुः स्वरूपमेव तत् ततो नातिरिक्तं । ननु च तदौपनिषदं पुरुषं पृच्छामीति शब्दबोध्यत्वप्रतीतेः ॥ कुतो बोधरूपत्वं तत्राह । शब्दो न यत्रे
ति । अभिधावृत्त्या विवक्षितं वाच्यत्वस्य व्यापारेण तद्बोधक इत्यर्थः । ननु भवतु नाम निरस्तभेदज्ञानरूपत्वं तथापि ह्यशोकत्वं कुतस्तत्राह । नाकारकसाध्य
क्रियाफलत्वात्स्वप्रकाशत्वसुखत्वं तत्सिद्धमत आह । यत्र बहुकारकसाध्यक्रियार्थ उत्पत्त्यादिचतुर्विधउत्पाद्याप्यविकार्यसंस्कार्यादिक्रियाफलं च नास्ति
इदं दृष्टेर्वा नो प्राप्तिर्वा क्रियात्मिका नन्दं प्राप्ति व्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः ॥ ननु तत्स्थाद्यभावेऽपि मायामूलापाकरणेन वि
कार्यत्वं स्यादेव ब्रीहिणामिव तुषापाकरणेनेत्याशंक्याह । माया विमुखे तस्मात्कंचिल्लज्जमाने वयस्मात्परैतीति दूरतोऽपसरति । तस्मादेवंभूते भग
वति नियमितमन साक्षात्परिणानां किमपि कृत्यमस्तीत्याह । सध्र्यगिति सध्र्यक् सहचरं मनः प्रतिनियम्य यस्मिन् स्थिता कृत्यवत्तयोऽयत
श्री जोकः नोभेदः तन्निरासोऽकर्त्तः तद्धेतिं साधनं जह्युः त्यजेयुः अन्यत्प्रयोजनं नाद्रियेत इत्यर्थः ॥ उपयोगाभावेन साधनानादरे दृष्टान्तः ॥
निवीयते स्वमित्रेतितिनिपाने कूपस्तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इन्द्रो नाद्रियेत तद्वदिति । यद्वा स्वैर्वराज
मनिद्रिति स्वराट् दरिद्रः स्वयं पालकः स तु कर्मकारदशायां गृहीतं निपानखनित्रं जहातीति तद्वदित्यर्थः ॥४८॥ ॥ ॥

अत्र चोदयति द्वाभ्यां हेतुभ्यां दृष्टादृष्टं तत्र नरकपातादि ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति अथो ग्र
तः कारणात्तद्दमाद्यादिकं प्रायश्चित्तं तेन समूलस्य दोषस्यानिवृत्तेः निवृत्तौ वा पुनस्तु पाप प्ररोहहरि गादिति भावः ८ किंच कृ
चित्कदाचिदपि भद्रात्पापान्निवर्त्तते कुचित्तदेव पुनराचरति यथा कुंजरः स्नातोपि रजोभिरात्मानं मलिनीकरोति तथा पापस्य
पुनर्दुर्निवारत्वे न नरकपातस्यावश्यंभावित्वात्प्रायश्चित्तं व्यर्थमिति परिहरति कर्मणि ... कृच्छ्रादिप्रायश्चित्तेनक

२

रोगो वा ... अपायत्वापं जानन्नप्यात्मनो हितं करोति भूयो विवशः प्रायश्चित्तमथो कथं ८ कश्चिन्निवर्त्तते भद्रात्क
ज २ चिद्भ्रतिते पुनः प्रायश्चित्तमथो पापाधिम्यं कुर्वीत च वत् ॥ श्रीवादरायणेस्तु बाद कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्य
ते अप्रविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं १० नास्य तपस्यमेनानुव्याप्तिया भिभवतीति हि एवानियमकृच्छ्रा जन्म नैदेमायं
कल्प्यते

र्मणा पापस्य निर्हारो नाशः आत्यंतिकः समूलो न हीष्यते अविद्वानधिकारी यस्मिन् तस्याभावस्तात्वत स्मात् :)
२
अप्रतो विद्या नाशाभावात् नच्छेपि तस्मिन् पापे तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहसंभवस्त्वेव किं तर्हि
मुख्यं प्रायश्चित्तं तदाह प्रायश्चित्तं तु मर्शनं ज्ञानं १० तच्चु नित्यमम प्रमचक्रं स नैर्त्तं भते नान्य इति सद्दृष्टांतमा
ह नेति पद्यमेवान्नमश्नतः पुरुषान् यथा व्याधते तथा नियमादि कर्तीद्देमायं तत्त्वज्ञा नाय समर्थो भवति ११

अनुवर्णिताः निरूतराध्याये व्याख्यातश्चतुर्थस्यादौ यतः यस्मिन् २ पंचमे द्वीपानां भागतो लक्षणेभो मानतश्च धरामंडलस्य संस्थानं विभक्तं यथा सृजत्तथा व्याख्यातमित्यर्थः ४ नानाउग्रयातनायेषु तान्नरकान् यथायेनोपायेन नरः यात नागच्छेत् तन्मे अधुना व्याख्यामर्हसि ५ तत्र तावन्नत्वा घकृत्प्रायश्चित्तं नानानरकादुर्निवारात् नचेदिति द्वाभ्याम नउक्तिपाणिभिर्मनोवाक्कायैः कृत स्यांहसः सस्येरेतशैवपांचित्तंयश्च त्रयंयानतन्न कुर्याच्चेत् तर्हि पुरुषः प्रेत्यमृत्वा नरकान् ध्रुवमुपैति मेमयायेभवतः कीर्तितातिग्मायातनायेषुतान् ॥ ६ ॥

अधर्मलक्षणानानरकाश्चानुवर्णिताः मन्वंतरश्च व्याख्यातश्चाद्यः स्वायंभुवोतः २ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च द्वीपवर्षसमुद्राद्रीनद्युद्यानवनस्पतीन् ३ धरामंडलसंस्थानं भागलक्षणमानतः ज्योतिषां विवराणां च यथेदमसृजद्विभुः ४ अधुनेह महाभाग यथैव नरकान्नरः नानोग्रयातनान्नेयात न्मे व्याख्यातुमर्हसि ५ श्रीशुकउवाच न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ।६ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्सेत रुजां निदानवित् ।७॥

यस्मादेवं तस्मात्पापस्य प्रायश्चित्ते नयतेत कदा मृत्योः पुरैवतत्रापि प्रतिपद्यतापमिति यमानेनात्मना देहेन पदा अविपतश्च पतिरहितोयावत तावत् मनासंहाने नमनसातत्रापि अस्य ग्रन्थस्य अतीवचिरकालेनदुःखितां बलतमर्हतीति देवगुरुपापतेः तत्र

ष्टीका यथ बुदृद्भिरिवानुमेसासांपिकेनान्यच्चापैरेरेपाति पातिनतनवां धर्मचिंतां सायंदतांतुतांप्रयाना घ्यथमरवर्णिताः

पं ५४

भा० ष०
३

भक्तिः स्वल्पापि मुक्तिं विवेत्याह सकृदिति तस्य गुरुलघुराग मात्रमसि स नतु ज्ञानं तन्मनः तानैतैव चीर्णानि निष्कृतं प्रायश्चित्तैः १७ इनमर्थमि
तिहासेनोपपादयति अत्र चेति मे मन्त्रः १८ कं स्वकुब्जे पुंदास्याः पतिः नाम्ना अजामिलः वंदीग्रहणं अक्षद्यूतेन कैत
वैर्वंचनादिभिश्च वृत्तिं जीन कां विभृत् पुष्णन् यातयामास पीडयामास १९ अष्टाशीत्या संवत्सराणां २ सम्पूर्णं संवधीमाहात्म्यं कालो ५

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः
१७ अत्र चोदाहरंतीममितिहासं पुरातनं दूतानां विष्णुयमयोः संवादं तं निबोध मे १८ कान्यकुब्जे द्विजः कश्चिद्दा
सीपतिरजामिलः नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः वंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः बिभ्रत्कुटुंबम
शुचिर्यातयामास देहिनः १९ एवं निवसतस्तस्य लालयानस्य तत्सुतान् कालोऽत्यगान्महान् राजन्नष्टाशीत्यायुषः समाः २०
तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं २१ स बद्धहृदयस्तस्मिन्नर्भके क
लभाषिणि निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं २२ भुंजानः प्रपिबन्खादन् बालकं स्नेहयंत्रितः भोजयन्पाययन्मूढो
न वेदागतमंतकं २३ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते मतिं चकार तनये बाले नारायणाह्वये २४

सगारसकियानित्यपि द्वायामाह अष्टाशीत्या संख्यायायुक्ताः समाः संवत्सरा २० प्रवयसः वृद्धस्य २१ वृद्धं हृदयं येन जर
ठो वृद्धः २२ २३ एतस्य दुपत्नान नादिश्री नारायण नामोपचार माहात्म्येन तद्द्विः क्रिरे वा भूयदिति सितोपयोगि वेनापिद्रष्टव्य २४

एतदेवविशदयतिद्वाभ्यां तपसाएकाग्र्येणमनसश्चेंद्रियाणांचऐकाग्र्यंपरमंतपइतिस्मृतेः ब्रह्मचर्येणं त्यागेनतद्धि स्मरणं कीर्त्तनंके
लिप्रेक्षणंगुह्यभाषणंसंकल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः विपरीतंब्रह्मचर्यमेतदेवाष्टलक्ष
णमिति शमेनमनसोनियमेनं दमेनबाह्येंद्रियाणांत्यागोदानं यमोऽहिंसादिः नियमोजपादिः १२ अस्यातिदुष्करत्वान्मनुष्यमेवान्य
त्प्रायश्चित्तमाह केचिदिति अनेनभक्तिप्रधानाविरलाइति केवलयातपआदिनिरपेक्षया वासुदेवपरायणाइति नाधिकारविशेष
णमेतत् किंत्वन्त्योपि [illegible] तत्राप्रवृत्तेरर्थान्निषिद्धं तपप्यैवस्मानादनुवादमात्रं १३ [illegible] ज्ञानेन [illegible] मितानह न तथाह्

तपसाब्रह्मचर्येणशमेनचदमेनच त्यागेनसत्यशौचाभ्यांयमेननियमेनच देहवाग्बुद्धिजंधीराधर्मज्ञाः श्रद्धयान्विताः क्षि
पंत्यघंमहदपिवेणुगुल्ममिवानलः १२ केचित्केवलयाभक्त्यावासुदेवपरायणाः अघंधुन्वंतिकार्त्स्न्येन नीहारमिवभास्करः
१३ नतथाह्यघवान्राजन् पूयेततपआदिभिः यथाकृष्णार्पितप्राणस्तत्पुरुषनिषेवया १४ सध्रीचीनोह्ययंलोकेपंथाः क्षे
मोऽकुतोभयंसुशीलाःसाधवोयत्रनारायणपरायणाः १५ प्रायश्चित्तानिचीर्णानिनारायणपराङ्मुखं नपुनंतिराजेंद्रसुराकुंभमिव आपगाः १६

येनतथापूयेततत्पुरुषनिषेवया कृष्णेऽर्पिताः प्राणायेन १४ तत्रहेतुः सध्रीचीनः समीचीनः अयंपंथाभक्तिमार्गः यद्वा क्षेमः
क्षेमत्वेहेतुः नकुतश्चिदपि विघ्नादेर्भयंयस्मिन् तदेवाह सुशीलाः कृपालवः साधवोनिष्कामाः एतादृशानामार्गाइवासहायता
निमित्तंभयंनापिकर्मिमार्गवत् गर्वमत्सरादियुक्तैरन्यपरिरप्युक्तत्वमुक्तं कृच्छ्रादीनितुभक्तिंविना नशोधयंतीत्याह प्रायश्चित्तानीति
नतस्यशोधकत्वेदृष्टांतमाह सुराकुंभमिवापगाइवेति १६

काठिनं चलघुत्वं गुरुत्वं च आङ्गुलत्वं इब तदुत्पलत्वं च शीततां चेत्यर्थः ॥ यद्युक्त स्तु स्पर्शनमपीं[ं]द्रियविषयं एव तथापि तस्य
स्पर्शनात्कोष्णमिस्तुक्तं । गुरुर्लघुरिति पाठे यणादेशः गुर्वादेसः । वक्ष्यमाण तान् धर्मान् जिघृक्षतस्तस्य कुनिर्भिन्नाहगिंद्रियाधि
किं वर्जातमित्यर्थः । तस्यां रोमाणि इंद्रियं महीरुहाश्च देवताः जाताः । वक्ष्यमाण निहिसेनातो लितेलघुत्वगुरुत्वयोः शीतोष्णत्वयोश्च विव
क्षी इति वयन मिति वा राज्ञिकाः ॥२२॥ तत्र लघित्वं तद्वहि स्थवातो वक्त्र आवृत्य स्थितः । कर्तरि निष्ठा । कथं भूतः लघात्व श्रीगुणा
वर्णः घुकाठिन्यमृदुगुर्वोष्णशीततां । जिघृक्षतस्त कुनिर्भिन्ना तस्यां रोम महीरुहाः ॥२२॥ तत्र चांतर्वहिर्वायुस्त्वचालघुगुणो
वृतास्थितः हस्तौरुरुहतुस्तस्य नानाकर्मचिकीर्षया ॥ तयोस्तु बलवानिंद्र आदानमुभयाश्रयं ॥२३॥ गतिं जिगीषतः पादौ रु
रुहातेभिकामिकां ॥ पद्भ्यां यज्ञः स्वयं हव्यं क्रियते नृभिः २४ ॥ ॥ ॥
पं ४२ ।
कर्मभिः
ता ।
अयमर्थः । हस्तिंद्रियमेव बहिः कं पूर्ति सहितं स्पर्शगिद्रियलोमप्रादेनोच्यते ॥ तत्र महीरुहाणां देवत्वं । अंतर्वहि
इमान्तं तदेव सकुशब्देनोच्यते ॥ तत्र वातो देवता । तथा चतृतीये वक्ष्यति । त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः
यविंनः अंशेनलोमभिः कंडूं यैरसौ प्रतिपद्यते । निर्भिन्नान्यस्य चर्माणि लोकपालोनिलोविशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते
नस्तुदस्तिरोमोप लक्षिताहगित्यर्थः । प्राणेनांशेनेति प्राणवायुव्याप्तेन हगिंद्रियेणेत्यर्थः । बहूकूच प्रकोले वकाएवांशोनि
मि तिव भिद्यते । हवो लोमानि लोममध्ये वनस्पतयः इति । रुरुहतुरिति भिन्नौ बलमिंद्रियं इंद्रो देवता । तदुभयाश्रयं
नारः र्थः ॥२३॥ अभिकामिकां अभीष्टां बिहिताभित्यर्थः ॥ पद्भ्यां सहेत यज्ञोविद्युरिव स्वयं तद्धिष्णात् रूपेणाश्रितः ॥ कु
गिता रवदा कर्मशक्तिरिंद्रियमुक्तं । हव्यं क्रियत इति गतिप्राप्यं यज्ञार्थं द्रव्यं विषयः स्कुक्तो । नमिरिति बुद्धिजीवि ष
सिद्धं शितिदर्शयन् राधिकारिसंबंधादिर्दर्शयति २४ ॥ ॥ ॥
वं व्याख्येयं का ॥ ॥ व
नां ९ धरे

आनंदोऽरतिः अमृतं स्वर्गादि तदर्थिनः शिश्नोऽधिष्ठानं उपस्थः इंद्रियं देवता प्रजापतिः स्थासीदिति ज्ञेयं ॥
प्रियं कामानां स्त्रीसंभोगानां संबंधि प्रियं सुखं ॥२५॥ धातुमलं भुक्तान्नादीनामसारांशं त्यजति ... मिश्नोर्गुदपायुर्मित्रो
... पुनरुपदेवतानि ... यथा ॥२६॥ गुर्यादि ... हात्पुरोदेहालयाणि आसिस्य ... सोः सर्वतोगं तुमिश्नोः निरभिद्यते स्तनुबं
... तोपगच्छतः ... पवनकृतंमरणं नाभ्यादीन्यधिष्ठानादीनि । नाभ्यांहिप्राणापानयोर्बंधविश्लेषे मृत्युरिति प्रसिद्धं ॥२७॥
... शिश्नो वै प्रजानंदामृतार्थिनः ॥ उपस्थ आसीत् कामानां प्रियं तदुभयाश्रये ॥२५॥ तुल्लिसच्छो धातुमलं निर
... ददं ॥ ततो पायुस्ततो मित्र ... उत्सर्ग ... उभयाश्रयः ॥२६॥ आसिसासोः पुरः पुर्या नाभिद्वारमपानतः ॥ तत्रापान
... पवनत्त्रमुभयाश्रयं ॥२७॥ आदित्सोरन्नपानानामासन् कुक्ष्यंत्रनाडयः ॥ नद्यः समुद्रास्तयोस्तुष्टिः पुष्टि
॥२८॥ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्ततश्चंद्रः संकल्पः काम एव च ॥२९॥ ॥ ॥

... नानामादित्सोः कुक्ष्यंत्राणि च नाडयश्चासन् ॥ तत्र कुक्षिरधिष्ठानं । अंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानी
... अन्नपानसंग्रहार्थयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः समुद्रादेवते । तुष्टिरुदरभरणे पुष्टिस्तु रसपरिणाम
... ॥ तदाश्रये तदुभयनिमित्ते ॥ अन्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्र ... तुष्टयः इति चतुष्टयं ॥ पेयसंग्रहेच्छोः कु
... नदीपुष्टयः इति विवेकः ॥ निदिध्यासोनितरां चिंतयितुमिच्छोः कामाभिलाषः । हृदय ... मनः चंद्रः संकल्पः अ
भिलाषादयः ॥२९॥ ॥ ॥ ॥

मद्भुतार्णौ ३

किं बहुना यत्किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमित्यन्वयः॥ भगवन्तमैश्वर्ययुक्तं॥ महस्वत् तेजोयुक्तं॥ ओजः सह
सी इंद्रियमनःशक्ती तद्युक्तं॥ बलं दार्ढ्यं॥ श्रीः शोभा ह्रीरकर्मजुगुप्सा बुद्धिर्भूतिः संपत्तिः॥ आत्मा बुद्धिस्तद्युक्तं॥ अर्णो
वर्णः ॐ आधार्यवर्णमित्यर्थः॥ रूपमेव स्वरूपं अरूपवत् अरूपं च यत् तत्सर्वं परं तत्त्वं॥ न हि भूतिरित्यर्थः॥४२॥ मुख्यस सा
वतारान्वक्तुमाह॥ प्राधान्यत इति॥ अस्तु कथा श्रवणीयकर्णयोः कषायाः मलास्तान्शोधयंतीति तथा॥ तान्रूपस्वभा
यत्किंच लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत्॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरू
पं॥४२॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः॥ आपीयतां कर्णकषायशोषाननुक्रमिष्ये त
इमान्सुपेशान्॥४३॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः॥ ब्रह्मोवाच॥ यत्रोद्यतः क्षितितलोद्धरणा
य बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः॥ अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार॥१॥॥

तस्मिंदशाने संकार लीपव्यार्थः॥ हे ऋषे ते तुभ्यं अनु क्रमिष्ये तदनुक्रमणामृतं श्रयापीयतामित्यर्थः॥ यद्वा पीयता
मिति शात्रेतं आपिबतां कर्णकषायशोषानित्यर्थः॥४३॥ इति द्वितीये षष्ठः॥ सप्तमे भगवल्लीलावताराब्रह्मणोदिताः
नारदाय स्तुतत्कर्मप्रयोजनगुणैः सह॥ यत्र यदा क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं बिभ्रत् उद्यतोऽनंतः तदा तं दंष्ट्रया प्र
